उत्कण्ठितो३ऽभिशस्ते तु वाच्यक्षारितदूषिताः ॥ १०० ॥
४गुणैः प्रतीते त्वाहतलक्षणः कृतलक्षणः ।
५निर्लक्षणस्तु पाण्डुरपृष्ठः ६संकसुकोऽस्थिरे ॥ १०१ ॥
७तूष्णींशीलस्तु तूष्णीको ८विवशोऽनिष्टदुष्टधीः ।
९बद्धो निगडितो नद्धः कीलितो यन्त्रितः सितः ॥ १०२ ॥
सन्दानितः संयतश्च १०स्यादुद्दानन्तु बन्धनम् ।
११मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥ १०३ ॥
१२प्रतिक्षिप्तोऽधिक्षिप्तो१३ऽवकृष्टनिष्कासितौ समौ ।
१४आत्तगन्धोऽभिभूतो१५ऽपध्वस्तो न्यक्कृतधिक्कृतौ ॥ १०४ ॥

---

१. 'मतवाले'के ४ नाम हैं—मत्तः, शौण्डः, उत्कटः, क्षीबः ॥

२. 'उत्कण्ठित'के ४ नाम हैं—उत्कः, उत्सुकः, उन्मनाः (-नस्), उत्कण्ठितः ॥

३. 'निन्दित'के ४ नाम हैं—अभिशस्तः, वाच्यः, क्षारितः (+आक्षारितः), दूषितः । (किसी-किसीके मतमें 'मैथुनके विषयमें निन्दित'के ये नाम हैं) ॥

४. 'गुणोंसे प्रसिद्ध'के २ नाम हैं—आहतलक्षणः, कृतलक्षणः ॥

५. 'लक्षणहीन'के २ नाम हैं—निर्लक्षणः, पाण्डुरपृष्ठः ॥

६. 'अस्थिर'के २ नाम हैं—संकसुकः, अस्थिरः ॥

७. 'चुप रहनेवाले'के २ नाम हैं—तूष्णींशीलः, तूष्णीकः ॥

८. 'अनिष्ट तथा दुष्ट बुद्धिवाले'के २ नाम हैं—विवशः, अनिष्टदुष्टधीः ॥

९. 'बँधे हुए'के ८ नाम हैं—बद्धः, निगडितः, नद्धः, कीलितः, यन्त्रितः, सितः, संदानितः, संयतः ।

१०. 'बन्धन'के २ नाम हैं—उद्दानम्, बन्धनम् ॥

११. 'टूटे हुए मनवाले'के ४ नाम हैं—मनोहतः, प्रतिहतः, प्रतिबद्धः, हतः ॥

१२. 'प्रतिक्षिप्त'के २ नाम हैं—प्रतिक्षिप्तः, अधिक्षिप्तः ॥

१३. 'निष्कासित (घर आदिसे निकाले गये)'के २ नाम हैं—अवकृष्टः, निष्कासितः (+निःसारितः) ॥

१४. 'अभिभूत (नष्ट अभिमानवाले)'के २ नाम हैं—आत्तगन्धः, अभिभूतः ॥

१५. 'धिक्कारे गये'के ३ नाम हैं—अपध्वस्तः, न्यक्कृतः, धिक्कृतः । (किसी-किसीके मतसे 'आत्तगन्धः' आदि ५ नाम एकार्थक हैं) ॥

१निकृतस्तु विप्रकृतो २न्यक्कारस्तु तिरस्क्रिया।
परिभावो विप्रकारः परापर्यभितो भवः ॥ १०५ ॥
अत्याकारो निकारश्च ३विप्रलब्धस्तु वञ्चितः।
४स्वप्नक् शयालुर्निद्रालु५र्घूर्णितं प्रचलायितः ॥ १०६ ॥
६निद्राणः शयितः सुप्तो ७जागरूकस्तु जागरी।
८जागर्या स्याज्जागरणं जागरा जागरोऽपि च ॥ १०७ ॥
९विष्वगञ्चति विष्वद्र्यङ् १०देवद्र्यङ् देवमञ्चति।
११सहाञ्चति तु सध्र्यङ् स्यात् १२तिर्यङ् पुनस्तिरोऽञ्चति ॥ १०८ ॥
१३संशयालुः संशयिता १४गृहयालुर्गृहीतरि।
१५पतयालुः पातुकः स्यात् १६समौ रोचिष्णुरोचनौ ॥ १०९ ॥

---

१. 'तिरस्कृत'के २ नाम हैं—निकृतः, विप्रकृतः (+ तिरस्कृतः) ॥

२. तिरस्कार'के ९ नाम हैं—न्यक्कारः, तिरस्क्रिया (+तिरस्कारः), परिभावः, विप्रकारः, पराभवः, परिभवः, अभिभवः, अत्याकारः, निकारः ॥

३. 'ठगे गये'के २ नाम हैं—विप्रलब्धः, वञ्चितः ॥

४. 'सोनेवाले'के ३ नाम हैं—स्वप्नक् (-ज्), शयालुः, निद्रालुः ॥

५. 'नींदसे घूर्णित होते हुए'के २ नाम हैं—घूर्णितः, प्रचलायितः ॥

६. 'सोये हुए'के ३ नाम हैं—निद्राणः, शयितः, सुप्तः ॥

७. 'जागते हुए'के २ नाम हैं—जागरूकः (+जागरिता-तृ,), जागरी (-रिन्) ॥

८. 'जागने'के ४ नाम हैं—जागर्या, जागरणम्, जागरा, जागरः ॥

९. 'सब तरफ शोभनेवाले'का १ नाम है—विष्वद्र्यङ् (द्र्यञ्च्। + विश्वद्र्यङ्—द्र्यञ्च्) ॥

१०. 'देवोंकी पूजा करनेवाले'का १ नाम है—देवद्र्यङ् (-द्र्यञ्च्) ॥

११. 'साथ पूजन करने या रहनेवाले'का १ नाम है—सध्र्यङ् (ध्र्यञ्च्) ॥

१२. 'तिर्छे चलनेवाले'का १ नाम है—तिर्यङ् (-र्यञ्च्) ॥

१३. 'संशय करनेवाले'के २ नाम हैं—संशयालुः, संशयिता (-तृ। सांशयिकः) ॥

१४. 'ग्रहण करने (लेने) वाले'के २ नाम हैं—गृहयालुः, गृहीता (—तृ) ॥

१५. 'गिरनेवाले'के २ नाम हैं—पतयालुः, पातुकः ॥

१६. 'रुचने (शोभने) वाले'के २ नाम हैं—रोचिष्णुः, रोचनः ॥

१दक्षिणार्हस्तु दक्षिण्यो दक्षिणीयो२ऽथ दण्डितः ।
दापितः साधितो३ऽर्च्यस्तु प्रतीक्ष्यः ४पूजितेऽर्हितः ॥ ११० ॥
नमस्यितो नमसितोऽपचितावञ्चितोऽर्चितः ।
५पूजाऽर्हणा सपर्याऽर्चा ६उपहारबली समौ ॥ १११ ॥
७विक्लवो विह्वलः ८स्थूलः पीवा पीनश्च पीवरः ।
९चक्षुष्यः सुभगो १०द्वेष्योऽक्षिगतो११ऽथांसलो बली ॥ ११२ ॥
निर्दिग्धो मांसलश्चोपचितो१२ऽथ दुर्बलः कृशः ।
क्षामः क्षीणस्तनुश्छातस्तलिनाऽमांसपेलवाः ॥ ११३ ॥
१३पिचिण्डिलो बृहत्कुक्षितुन्दिम्तुन्दिकतुन्दिलाः ।
उदर्युदरिल—

---

१. 'दक्षिणाके योग्य'के ३ नाम हैं—दक्षिणार्हः, दक्षिण्यः, दक्षिणीयः ॥

२. 'दण्डितः (दण्ड पाये हुए)'के ३ नाम हैं—दण्डितः, दापितः, (+दायितः), साधितः ॥

३. 'पूज्य'के २ नाम हैं—अर्च्यः, प्रतीक्ष्यः (+अर्चनीयः, पूज्यः, पूजनीयः,·······) ॥

४. 'पूजित'के ७ नाम हैं—पूजितः, अर्हितः, नमस्यितः, नमसितः, अपचितः (+अपचायितः,), अञ्चितः, अर्चितः ॥

५. 'पूजा'के ४ नाम हैं—पूजा, अर्हणा, सपर्या, अर्चा ॥

शेषश्चात्र—पूजा त्वपचितिः ।

६. 'उपहार' (यथा—काकबलि, जीवबलि,······)के २ नाम हैं—उपहारः, बलिः, (पु स्त्री) ॥

७. 'विह्वल'के २ नाम हैं—विक्लवः, विह्वलः ॥

८. 'मोटे'के ४ नाम हैं—स्थूलः, पीवा (-वन्), पीनः, पीवरः ॥

९. 'सुन्दर, सुभग'के २ नाम हैं—चक्षुष्यः, सुभगः ॥

१०. 'द्वेषयोग्य (आँखमें गड़े हुए)'के २ नाम हैं—द्वेष्यः, अक्षिगतः ॥

११. 'बलवान्, मांसल'के ५ नाम हैं—अंसलः, बली (-लिन् । +बलवान् -वत्), निर्दिग्धः, मांसलः, उपचितः ॥

१२. 'दुर्बल'के ९ नाम हैं—दुर्बलः, कृशः, क्षामः, क्षीणः, तनुः, छातः, तलिनः, अमासः, पेलवः ॥

१३. 'बड़े तोंदवाले'के ७ नाम हैं—पिचिण्डिलः, बृहत्कुक्षिः, तुन्दी (-दिन), तुन्दिकः, तुन्दिमः, उदरी (-रिन्), उदरिलः (+उदरिकः, तुन्दिभः) ॥

—१विखविख्युविग्रा अनासिके ॥ ११४ ॥
२नतनासिकेऽवनाटोऽवटीटोऽवभ्रटोऽपि च ।
३खरणास्तु खरणसो ४नःक्षुद्रः क्षुद्रनासिकः ॥ ११५ ॥
५खुरणाः स्यात् खुरणसः ६उन्नसस्तूग्रनासिकः ।
७पङ्गुःश्रोणः ८खलतिस्तु खल्वाट ऐन्द्रलुप्तिकः ॥ ११६ ॥
शिपिविष्टो बभ्रु-९रथ काणः कनन एकदृक् ।
१०पृश्निरल्पतनौ ११कुब्जे गडुलः १२कुकरे कुणिः ॥ ११७ ॥
१३निखर्वः खट्टनः खर्वः खर्वशाखश्च वामनः ।
१४अकर्ण एडो बधिरो १५दुश्चर्मा तु द्विनग्नकः ॥ ११८ ॥
वण्डश्च शिपिविष्टश्च—

---

१. 'नकटे'के ४ नाम हैं—विखः, विख्युः, विग्रः, अनासिकः ॥

२. 'नकचिपटे (चिपटी नाकवाले)'के ४ नाम हैं—नतनासिकः, अवनाटः, अवटीटः, अवभ्रटः ॥

शेषश्चात्र—अथ चिपिटो नम्रनासिके ।

३. 'नुकीली नाकवाले'के २ नाम हैं—खरणाः (-णस्), खरणसः ॥

४. 'छोटी नाकवाले'के २ नाम हैं—नःक्षुद्रः, क्षुद्रनासिकः ॥

५. 'खुरके समान (बड़ी) नाकवाले'के २ नाम हैं—खुरणाः (-णस्), खुरणसः ॥

६. 'ऊँची नाकवाले'के २ नाम हैं—उन्नसः, उग्रनासिकः ॥

७. 'पँगुल'के २ नाम हैं—पङ्गुः, श्रोणः ॥

शेषश्चात्र—पङ्गुलस्तु पीठसर्पी ।

८. 'खल्वाट (जिसके मस्तकमध्यके बाल झड़कर गिर गये हों, उस'के ५ नाम हैं—खलतिः, खल्वाटः (+खल्तः), ऐन्द्रलुप्तिकः शिपिविष्टः, बभ्रुः ॥

९. 'काना'के ३ नाम हैं—काणः, कननः, एकदृक् (-दृश् । +एकाक्षः) ॥

१०. 'नाटा, ठिंगना (छोटी कदवाले)'के २ नाम हैं—पृश्निः, अल्पतनुः ॥

शेषश्चात्र—किरातस्त्वल्पवर्ष्मणि ।

११. 'कुबड़ा'के २ नाम हैं—कुब्जः, (+न्युब्जः), गडुलः ॥

१२. 'लूला'के २ नाम हैं—कुकरः, कुणिः ।

१३. 'बौना'के ५ नाम हैं—निखर्वः, खट्टनः, खर्वः, खर्वशाखः, वामनः ॥

शेषश्चात्र—खर्वे ह्रस्वः ।

१४. 'बहरे'के ३ नाम हैं—अकर्णः, एडः, बधिरः ॥

१५. 'खराब (रूखे) चमड़ेवाले या—नपुंसक'के ४ नाम हैं—दुश्चर्मा (-र्मन्), द्विनग्नकः, वण्डः, शिपिविष्टः ॥

—१खोडखोरौ तु खञ्जके ।

२विकलाङ्गस्तु पोगण्ड ३ऊर्ध्वज्ञुरूर्ध्वजानुकः ॥ ११९ ॥

ऊर्ध्वज्ञश्चा४प्यथ प्रज्ञुप्रज्ञौ विरलजानुके ।

५संज्ञुसंज्ञौ युतजानौ ६वलिनो वलिभः समौ ॥ १२० ॥

७उदग्रदन् दन्तुरः स्यान् ८प्रलम्बाण्डस्तु मुष्करः ।

९अन्धो गताक्ष १०उत्पश्य उन्मुखोऽ११धोमुखस्त्ववाङ् ॥ १२१ ॥

१२मुण्डस्तु मुण्डितः १३केशी केशवः केशिकोऽपि च ।

१४वलिरः केकरो—

---

१. 'खञ्ज (लँगड़े)'के ३ नाम हैं—खोडः, खोरः, खञ्जकः (+खञ्जः) ॥

२. 'किसी अङ्ग से हीन या अधिक (यथा—२,३ या ४ अङ्गुलियों-वाला, या छः अङ्गुलियोंवाला—छांगुर)'के २ नाम हैं—विकलाङ्गः, पोगण्डः ॥

३. 'जिसका घुटना ऊपर उठा हो, उस'के ३ नाम हैं—ऊर्ध्वज्ञुः, ऊर्ध्व-जानुकः, ऊर्ध्वज्ञः ॥

४. 'वातादि दोषसे जिसका घुटना अलग-अलग रहे अर्थात् बैठनेमें सटता न हो उस'के ३ नाम हैं—प्रज्ञुः, प्रज्ञः, विरलजानुकः ॥

५. मिले (सटे) हुए घुटनेवाले'के ३ नाम हैं—संज्ञुः, संज्ञः, युतजानुः ॥

६. (रोग या बुढापा आदिसे) 'सिकुड़े हुए चमड़ेवाले'के २ नाम हैं—वलिनः, वलिभः ॥

७. 'दन्तुर (बाहर निकले हुए दाँतवाले)'के २ नाम हैं—उदग्रदन् (-त्), दन्तुरः ॥

८. 'बढ़े हुए अण्डकोषवाले'के २ नाम हैं—प्रलम्बाण्डः, मुष्करः ॥

९. 'अन्धे'के २ नाम हैं—अन्धः, गताक्षः ॥

शेषश्चात्र—अनेडमूकस्त्वन्धे ।

१०. 'ऊपरकी ओर उठे हुए मुखवाले'के २ नाम हैं—उत्पश्यः, उन्मुखः ॥

११. 'नीचेकी ओर दबे हुए मुखवाले'के २ नाम हैं—अधोमुखः, अवाङ (-वाञ्च्) ॥

शेषश्चात्र—न्युब्जस्त्वधोमुखे ।

१२. 'मुण्डित (शिरके बालको मुँड़ाए हुए)'के २ नाम हैं—मुण्डः, मुण्डितः ॥

१३. 'शिरपर बाल बढाये हुए'के ३ नाम हैं—केशी (-शिन्), केशवः, केशिकः ।

१४. 'सर्गपाताली (जो एक आँखको ऊपर उठाकर देखा करता हो, उस)'के २ नाम हैं—वलिरः, केकरः ॥

—१वृद्धनाभौ तुण्डिलतुण्डिभौ ॥ १२२ ॥
२आमयाव्यपटुर्ग्लानो ग्लास्नुर्विकृत आतुरः ।
व्याधितोऽभ्यमितोऽभ्यान्तो ३दद्रुरोगी तु दद्रुणः ॥ १२३ ॥
४पामनः कच्छुरस्तुल्यौ ५सातिसारोऽतिसारकी ।
६वातकी वातरोगी स्या७च्छ्लेष्मलः श्लेष्मणः कफी ॥ १२४ ॥
८क्लिन्ननेत्रे चिल्लचुल्लौ पिल्लो९ऽथाऽर्शोयुगर्शसः ।
१०मूर्च्छिते मूर्त्तमूर्च्छालौ ११सिध्मलस्तु किलासिनि ॥ १२५ ॥
१२पित्तं मायुः १३कफः श्लेष्मा बलाशः स्नेहभूः खटः ।
१४रोगो रुजा रुगातङ्को मान्द्यं व्याधिरपाटवम् ॥ १२६ ॥
आम आमय आकल्यमुपतापो गदः समाः ।

---

१. 'बड़ी नाभिवाले'के ३ नाम हैं- वृद्धनाभिः, तुण्डिलः, तुण्डिभः ॥

२. 'रोगी'के ६ नाम हैं—आमयावी (– विन्), अपटुः, ग्लानः, ग्लास्नुः, विकृतः, आतुरः, व्याधितः (+रोगितः, रोगी – गिन्), अभ्यमितः, अभ्यान्तः ॥

३. 'दादके रोगी'के २ नाम हैं—दद्रुरोगी (– गिन), दद्रुणः (+दद्रुणः) ॥

४. 'पामा रोगी'के २ नाम हैं—पामनः (+पामरः), कच्छुरः ॥

५. 'अतिसारके रोगी'के २ नाम हैं—सातिसारः, अतिसारकी (–किन् । +अतीसारकी – किन्) ॥

६. 'वातरोगी'के २ नाम हैं—वातकी (–किन्), वातरोगी (–गिन्)॥

७. 'कफके रोगी'के ३ नाम हैं—श्लेष्मलः, श्लेष्मणः, कफी (—फिन्)॥

८. 'कीचरसे भरी हुई आँखवाले'के ४ नाम हैं—क्लिन्ननेत्रः, चिल्लः, चुल्लः, पिल्लः ॥

९. 'बवासीरके रोगी'के २ नाम हैं—अर्शोयुक् (—ज्), अर्शसः ॥

१०. 'मूर्च्छाके रोगी, मूर्च्छित'के ३ नाम हैं—मूर्च्छितः, मूर्त्तः, मूर्च्छालः ॥

११. 'सिध्म (सिहुला, सेंहुआ, या—पपड़ीके समान चमड़ा हो जाना) के रोगी'के २ नाम हैं—सिध्मलः, किलासी (—सिन्) ॥

१२. 'पित्तके दो नाम हैं—पित्तम् , मायुः (पु) ॥

शेषश्चात्र—पित्ते पलाग्निः पलज्वरः स्यादग्निरेचकः ।

१३. 'कफ'के ५ नाम हैं—कफः, श्लेष्मा (–ष्मन्), बलाशः, स्नेहभूः, खटः ॥

शेषश्चात्र—कफे शिङ्घानकः खेटः ॥

१४. 'रोग'के १२ नाम हैं—रोगः, रुजा, रुक् (—ज्), आतङ्कः, मान्द्यम् , व्याधिः, अपाटवम् , आमः, आमयः, आकल्यम् , उपतापः, गदः ॥

१क्षयः शोषो राजयक्ष्मा यक्ष्मा२ऽथ क्षुत्क्षुतं क्षवः ॥ १२७ ॥
३कासस्तु क्षवथुः ४पामा खसः कच्छूर्विचर्चिका ।
५कण्डूः कण्डूयनं खर्जूः कण्डूया६ऽथ क्षतं व्रणः ॥ १२८ ॥
अरुरीर्मं क्षणनुश्च ७रूढव्रणपदं किणः ।
८श्लीपदं पादवल्मीकः ९पादस्फोटो विपादिका ॥ १२९ ॥
१०स्फोटकः पिटको गण्डः ११पृष्ठग्रन्थिः पुनर्गडुः ।
१२श्वित्रं स्यात्पाण्डुरं कुष्ठं १३केशघ्नन्त्विन्द्रलुप्तकम् ॥ १३० ॥
१४सिध्म किलासं त्वक्पुष्पं सिध्मं—

---

१. 'क्षय (टी० बी०) रोग'के ४ नाम हैं—क्षयः, शोषः, राजयक्ष्मा, यक्ष्मा (२-क्ष्मन् , पु) ॥

२. 'छींक'के तीन नाम हैं—क्षुत् , क्षुतम् , क्षवः ॥

३. 'खांसी'के २ नाम हैं—कासः, क्षवथुः (पु) ॥

४. 'पामारोग'के ४ नाम हैं—पामा (-मन् ,+मा, स्त्री) खसः, कच्छूः (स्त्री), विचर्चिका ॥

५. 'खाज'के ४ नाम हैं—कण्डूः, कण्डूयनम् , खर्जूः (स्त्री), कण्डूया (+कण्डूतिः) ॥

६. 'घाव, फोड़ा'के ५ नाम हैं—क्षतम् , व्रणः (पु न), अरुः (—रुस् , न), ईर्मम् (न ।+न पु), क्षणनुः (पु) ॥

७. 'घट्ठा'का २ नाम हैं—रूढव्रणपदम्, किणः ॥

८. 'श्लीपद (फीलपांव) के २ नाम हैं—श्लीपदम् , पादवल्मीकः (पु न) ॥

९. 'बिवाय'के २ नाम हैं—पादस्फोटः, विपादिका ॥

१०. 'फुंसी'के ३ नाम हैं—स्फोटकः, (+विस्फोटः), पिटकः (त्रि), गण्डः ॥

११. 'कूबड़'के २ नाम हैं—पृष्ठग्रन्थिः, गडुः (पु) ॥

१२. 'सफेद कोढ़ (चरकरोग)'के ३ नाम हैं—श्वित्रम् , पाण्डुरम् , कुष्ठम् ॥

१३. 'बाल झड़नेके रोग'के २ नाम हैं—केशघ्नम् , इन्द्रलुप्तकम् (+इन्द्रलुप्तम) ॥

१४. 'सिंहुला, सेंहुआरोग'के ४ नाम हैं—सिध्म (-मन् न), किलासम्, त्वक्पुष्पम् , सिध्मम् ॥

—१कोठस्तु मण्डलम् ।
२गलगण्डो गण्डमालो ३रोहिणी तु गलाङ्कुरः ॥ १३१ ॥
४हिक्का हेका च हृल्लासः ५प्रतिश्यायस्तु पीनसः ।
६शोथस्तु श्वयथुः शोफे ७दुर्नामाऽर्शो गुदाङ्कुरः ॥ १३२ ॥
८छर्दी प्रच्छर्दिका छर्दिर्वमथुर्वमनं वमिः ।
९गुल्मः स्यादुदरग्रन्थि१०रुदावर्तो गुदग्रहः ॥ १३३ ॥
११गतिर्नाडीव्रणे १२वृद्धिः कुरण्डश्चाण्डवर्द्धने ।
१३अश्मरी स्यान्मूत्रकृच्छ्रे १४प्रमेहो बहुमूत्रता ॥ १३४ ॥
१५आनाहस्तु विबन्धः स्याद्१६ ग्रहणीरुक्प्रवाहिका ।

---

१. 'चकत्ता होनेके रोग'के २ नाम हैं—कोठः, मण्डलम् (त्रि । + मण्डलकम्) ॥

२. 'गलगण्ड रोग'के २ नाम हैं—गलगण्डः, गण्डमालः ॥

३. 'गलेके रोग-विशेष'के २ नाम हैं—रोहिणी, गलाङ्कुरः ॥

४. 'हिचकी'के ३ नाम हैं—हिक्का, हेका, हृल्लासः ॥

५. 'पीनस रोग (सर्दी जुकाम)'के २ नाम हैं—प्रतिश्यायः, पीनसः ॥

६. 'शोथ, सूजन'के ३ नाम हैं—शोथः (पु । + न), श्वयथुः (पु), शोफः ॥

७. 'बवासीर'के ३ नाम हैं—दुर्नाम (-मन्), अर्शः (-र्शस् । २ न), गुदाङ्कुरः (+ गुदकीलः) ॥

८. 'वमन, उल्टी, कय'के ६ नाम हैं—छर्दिः (न स्त्री), प्रच्छर्दिका, छर्दिः (-र्दिस् , स्त्री), वमथुः (पु), वमनम्, वमिः (स्त्री) ॥

९. 'गुल्म रोग (पेटमें गोला-सा उठकर शूल पैदा करनेवाले रोग-विशेष)'के २ नाम हैं—गुल्मः (पु न), उदरग्रन्थिः ॥

१०. 'उदावर्त (गुदासे काँच निकलनेका रोग)'के २ नाम हैं—उदावर्तः, गुदग्रहः ॥

११. नाड़ीके रोग-विशेष'के २ नाम हैं—गतिः, नाडीव्रणः ॥

१२. 'फोता (अण्डकोष) बढने'के ३ नाम हैं—वृद्धिः, कुरण्डः, अण्ड-वर्द्धनम् (यौ०- अण्डवृद्धः, कोषवृद्धिः,..........) ॥

१३. 'मूत्रकृच्छ्र रोग'के २ नाम हैं—अश्मरी, मूत्रकृच्छ्रम् ॥

१४. 'प्रमेहरोग'के २ नाम हैं—प्रमेहः (+ मेहः), बहुमूत्रता ॥

१५. 'आनाह (मल-मूत्र रुक जानेका) रोग'के २ नाम हैं—आनाहः, विबन्धः ॥

१६. 'संग्रहणी रोग'के २ नाम हैं—ग्रहणीरुक् (-ज् । + ग्रहणी, संग्रहणी), प्रवाहिका ।

१व्याधिप्रभेदा विद्रधिभगन्दरज्वरादयः ॥ १३५ ॥
२दोषज्ञस्तु भिषग्वैद्य आयुर्वेदी चिकित्सकः ।
रोगहार्यगदङ्कारो ३भेषजन्तन्त्रमौषधम् ॥ १३६ ॥
भैषज्यमगदो जायु४श्चिकित्सा रुक्प्रतिक्रिया ।
उपचर्योपचारो च ५लङ्घनन्त्वपतर्पणम् ॥ १३७ ॥
६जाङ्गुलिको विषभिषक् ७स्वास्थ्ये वार्तमनामयम् ।
सद्यारोग्ये ८पटूल्लाघवार्तकल्यास्तु नीरुजि ॥ १३८ ॥
९कुसृत्या विभवान्वेषी पार्श्वकः सन्धिजीवकः ।
१०सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुदः ॥ १३९ ॥
११चपलश्चिकुरो—

---

१. 'विद्रधिः (स्त्री ।+पु), भगन्दरः, ज्वरः, आदि ('आदि शब्द से —अर्बुदः,.........) क्रमशः भीतरी फोड़ा, भगन्दर (गुदाका रोग), ज्वर आदि (आदिसे 'अर्बुद' आदिका संग्रह है) ये व्याधिभेद अर्थात् रोगोंके भेद हैं ॥

२. 'चिकित्सक (वैद्य, हकीम, डाक्टर)'के ७ नाम हैं—दोषज्ञः, भिषक्, (-ज्), वैद्यः, आयुर्वेदी (-दिन् । +आयुर्वेदिकः), चिकित्सकः, रोगहारी (-रिन्), अगदङ्कारः ॥

३. 'दवा'के ६ नाम हैं—भेषजम्, तन्त्रम्, औषधम् (पु न), भैषज्यम्, अगदः, जायुः (पु) ॥

४. 'चिकित्सा, इलाज'के ४ नाम हैं—चिकित्सा, रुक्प्रतिक्रिया, उपचर्या, उपचारः ॥

५. 'लङ्घन (रोगके कारण भोजन-त्याग करने)'के २ नाम हैं—लङ्घनम्, अपतर्पणम् ॥

६. 'विषके वैद्य'के २ नाम हैं—जाङ्गुलिकः, विषभिषक् (षज् ।+विषवैद्यः) ॥

७. 'स्वास्थ्य'के ५ नाम हैं—स्वास्थ्यम्, वार्तम्, अनामयम्, सद्यम्, आरोग्यम् ॥

८. 'नीरोग, स्वस्थ'के ५ नाम हैं—पटुः, उल्लाघः, वार्तः, कल्यः, नीरुक् (-ज् । + नीरोगः, स्वस्थः) ॥

९. 'कपटसे धन चाहनेवाले'के २ नाम हैं—पार्श्वकः, सन्धिजीवकः ॥

१०. 'भूषणादिसे अलङ्कृतकर ब्राह्मविधिसे कन्यादान करनेवाले'का १ है—कूकुदः ॥

शेषश्चात्र—कूकुदे तु कूपदः पारिभिनः ।

११. 'चपल'के २ नाम हैं—चपलः, चिकुरः (+चञ्चलः) ॥

—१नीलीरागस्तु स्थिरसौहृदः ।
२ततो हरिद्रारागोऽन्यः ३सान्द्रस्निग्धस्तु मेदुरः ॥ १४० ॥
४गेहेनर्दी गेहेशूरः पिण्डीशूरो५ऽस्तिमान् धनी ।
६स्वस्थानस्थः परद्वेषी गोष्ठश्वो७ऽथापदि स्थितः ॥ १४१ ॥
आपन्नो८ऽथापद्विपत्तिर्विपन ९स्निग्धस्तु वत्सलः ।
१०उपाध्यभ्यागारिकौ तु कुटुम्बव्यापृते नरि ॥ १४२ ॥
११जैवातृकस्तु दीर्घायु१२स्त्रासदायी तु शङ्करः ।
१३अभिपन्नः शरणार्थी १४कारणिकः परीक्षकः॥ १४३ ॥

---

१. 'दृढ मित्रता या प्रेम करनेवाले'के २ नाम हैं—नीलीरागः, स्थिर-सौहृदः ॥

२. 'क्षणिक (कम समयके लिए) मित्रता या प्रेम करनेवाले'का १ नाम है—हरिद्रारागः ॥

३. 'अधिक स्निग्ध (स्नेह रखनेवाले)'के २ नाम हैं—सान्द्रस्निग्धः, मेदुरः ॥

४. 'घरमें ही शूरता प्रदर्शित करनेवाले (किन्तु अवसर पड़नेपर मैदान छोड़कर भाग या छिप जानेवाले)'के ३ नाम हैं—गेहेनर्दी (-र्दिन्), गेहेशूरः, पिण्डीशूरः ॥

५. 'धनवान्'के ३ नाम हैं—अस्तिमान् (-मत्), धनी (-निन् । धन-वान्-वत् , धनिक,............) ॥

६. 'अपने स्थानपर रहकर दूसरेसे द्वेष करनेवाले'का १ नाम है—गोष्ठश्वः ॥

७. 'आपत्तिमें पड़े हुए'का १ नाम है—आपन्नः ॥

८. 'आपत्तिके ३ नाम हैं—आपत् (-द्), विपत्तिः, विपत् (-द् । + आपदा, आपत्तिः, विपदा) ॥

९. 'स्नेही'के २ नाम हैं—स्निग्धः, वत्सलः ॥

१०. 'स्त्री-पुत्रादि परिवारके पालन-पोषणमें लगे हुए'के २ नाम हैं—उपाधिः (पु), अभ्यागारिकः ॥

११. 'दीर्घायु'के २ नाम हैं—जैवातृकः, दीर्घायुः, (-युस् । (+आयु-ष्मान्,-मत्, चिरायुः—युष्) ॥

१२. 'दूसरेको भयभीत करनेवाले'के २ नाम हैं—त्रासदायी (-यिन्), शङ्करः ॥

१३. 'शरणार्थी'के २ नाम हैं—अभिपन्नः, शरणार्थी (-र्थिन्) ॥

१४. 'परीक्षा लेनेवाले'के २ नाम हैं—कारणिकः, परीक्षकः ॥

१समर्धुकस्तु वरदो २व्रातीनाः सङ्घजीविनः ।
३सभ्याः सदस्याः पार्षद्याः सभास्ताराः सभासदः ॥ १४४ ॥
सामाजिकाः ४सभा संसत्समाजः परिषत्सदः ।
पर्षत्समज्या गोष्ठ्यास्था आस्थानं समितिर्घटा ॥ १४५ ॥
५सांवत्सरो ज्यौतिषिको मौहूर्तिको निमित्तवित् ।
दैवज्ञगणकादेशिज्ञानिकार्तान्तिका अपि ॥ १४६ ॥
विप्रश्निकेक्षणिकौ च ६सैद्धान्तिकस्तु तान्त्रिकः ।
७लेखकोऽक्षरपूर्वाः स्युश्चणजीवकचञ्चवः ॥ १४७ ॥
वार्णिको लिपिकर ८अक्षरन्यासे लिपिर्लिविः ।

---

१. 'वरदान देनेवाले'के २ नाम हैं—समर्धुकः, वरदः ॥

२. परिश्रमकर जीविका चलानेवाले अनेकजातीय समुदाय'के २ नाम हैं—व्रातीनाः, सङ्घजीविनः (-विन्) ॥

३. 'सदस्यों, सभासदों'के ६ नाम हैं—सभ्याः, सदस्याः, पार्षद्याः (+पारिषद्याः), सभास्ताराः, सभासदः (-द्), सामाजिकाः। ('व्रातीन' आदि शब्दोंके बहुत्वकी अपेक्षा से बहुवचन कहा गया है ये एक व्यक्तिक प्रयोगमें एकवचन में भी प्रयुक्त होते हैं) ॥

४. सभाके १२ नाम हैं—सभा, संसत् (-द्), समाजः, परिषत् (-द्), सदः, (-दस्, स्त्री न), पर्षत् (-द् स्त्री), समज्या, गोष्ठी, आस्था, आस्थानम् (न स्त्री), समितिः, घटा ॥

५. 'ज्यौतिषी, दैवज्ञ'के ११ नाम हैं—सांवत्सरः, ज्यौतिषिकः, मौहूर्तिकः (+मौहूर्तः), निमित्तवित् (+नैमित्तः, नैमित्तिकः। -द्-विद्), दैवज्ञः, गणकः, आदेशी (-शिन्), ज्ञानी (-निन्), कार्तान्तिकः, विप्रश्निकः, ईक्षणिकः ॥

६. (ज्यौतिष, वैद्यक, आदि), सिद्धान्तके जानकार वाले'के २ नाम हैं—सैद्धान्तिकः, तान्त्रिकः ॥

७. 'लेखक, लिपिक (क्लर्क)'के ६ नाम हैं—लेखकः, अक्षरचणः, अक्षरजीवकः, अक्षरचञ्चुः, वार्णिकः, लिपिकरः (+लिविकरः) ॥

शेषश्चात्र—अथ कायस्थः, करणोऽक्षरजीविनि ।

विमर्श :—'अक्षरचञ्चुः' शब्दके स्थानमें 'अक्षरचुञ्चु' शब्द होना चाहिए, क्योंकि 'पाणिनि'ने 'तेन वित्तश्चुञ्चुप्चणपौ' (५।२।२६ इस सूत्रमें प्रथम चकारको भी अकारान्त न कहकर उकारान्त) ही 'चुञ्चुप्' प्रत्यय किया है ॥

८. 'लिखावट, लिपि'के ३ नाम हैं—अक्षरन्यासः, लिपिः, लिविः (२ स्त्री। +लिखिता) ॥

१मषिधानं मषिकूपी २मलिनाम्बु मषी मसी ॥ १४८ ॥
३कुलिकस्तु कुलश्रेष्ठी ४सभिको द्यूतकारकः ।
५कितवो धूर्तकृद्धूर्तोऽक्षधूर्तश्चाक्षदेविनि ॥ १४९ ॥
६दुरोदरं कैतवञ्च द्यूतमक्षवती पणः ।
७पाशकः प्रासकोऽक्षश्च देवनः ८स्तत्पणो ग्लहः ॥ १५० ॥
९अष्टापदः शारिफलं १०शारः शारिश्च खेलनी ।
११परिणायस्तु शारीणां नयनं स्यात्समन्ततः ॥ १५१ ॥
१२समाह्वयः प्राणिद्यूतं १३व्यालग्राह्याहितुण्डकः ।
१४स्यान्मनोजवसस्तातनुल्यः—

---

१. 'दावात'के २ नाम हैं—मषिधानम्, मषिकूपी ॥

२. 'स्याही, रोशनाई'के ३ नाम हैं—मलिनाम्बु, मषी, मसी (+मषिः, मषी । २ स्त्री पु) ॥

३. 'व्यापारियोंमें श्रेष्ठ'के २ नाम हैं—कुलिकः (+कुलकः), कुलश्रेष्ठी (-ष्ठिन्) ॥

४. 'जुआ खेलानेवाले'के २ नाम हैं—सभिकः, द्यूतकारकः ॥

५. 'जुआ खेलनेवाले'के ५ नाम हैं—कितवः, द्यूतकृत्, धूर्तः, अक्षधूर्तः, अक्षदेवी (-विन्) ॥

६. 'जुआ, द्यूत'के ५ नाम हैं—दुरोदरम् (पु न), कैतवम्, द्यूतम् (पु न), अक्षवती, पणः ॥

७. 'पाशा'के ४ नाम हैं—पाशकः, प्रासकः, अक्षः, देवनः ॥

८. 'दावपर रखे हुए धनादि'का १ नाम है—ग्लहः ॥

९. 'बिसात (जिसपर सतरंज या चौसरकी गोटिया रखकर खेला जाता है, उस (कपड़े आदिके बने हुए फलक)'के २ नाम हैं—अष्टापदः, शारिफलम् (+शारिफलकः । २ पु न) ॥

१०. (सतरंज या चौसर आदिकी)'गोटियों-मोहरों'के ३ नाम हैं—शारः (पु स्त्री), शारिः (स्त्री । + पु), खेलनी ॥

११. 'गोटियोंके चलने (एक स्थानसे दूसरे स्थानोंमें रखने)'का १ नाम है—परिणायः ॥

१२. दाव पर धनादि रखकर भेड़, मुर्गे, तीतर आदि प्राणियोंको परस्पर में लड़ाने'के २ नाम हैं—समाह्वयः, प्राणिद्यूतम् ॥

१३. 'सँपेरा'के २ नाम हैं—व्यालग्राही (-हिन्), आहितुण्डकः ॥

१४. 'पिताके तुल्य (चाचा आदि वय, विद्या, पद आदिसे) पूज्य व्यक्ति'के २ नाम हैं—मनोजवसः (+मनोजवः[1]), तातनुल्यः ॥

---

१. यथाऽह व्याडिः—"जनः पितृसधर्मा यः स ताताहों मनोजवः ॥"

—१शास्ता तु देशकः ॥ १५२ ॥
२सुकृती पुण्यवान धन्यो ३मित्रयुर्मित्रवत्सलः ।
४क्षेमङ्करो रिष्टतातिः शिवतातिः शिवङ्करः ॥ १५३ ॥
५श्रद्धालुरास्तिकः श्राद्धो ६नास्तिकस्तद्विपर्यये ।
७वैरङ्गिको विरागार्हो ८वीतदम्भस्त्वकल्कनः ॥ १५४ ॥
९प्रणाय्योऽसम्मतो१०ऽन्वेष्टाऽनुपद्य११थ सहः क्षमः ।
शक्तः प्रभूष्णु१२र्भूतात्तस्त्वाविष्टः १३शिथिलः श्लथः ॥ १५५ ॥
१४संवाहकोऽङ्गमर्दः स्यात् १५नष्टबीजस्तु निष्कलः ।
१६आसीन उपविष्टः स्याद्—

---

१. 'शासक'के २ नाम हैं—शास्ता (-स्तृ । + शासकः), देशकः ॥

२. 'पुण्यवान्'के ३ नाम हैं—सुकृती (-तिन्), पुण्यवान् (-वत्), धन्यः ॥

३. 'मित्रवत्सल'के २ नाम हैं—मित्रयुः, मित्रवत्सलः ॥

४. 'मङ्गलकर्ता'के ४ नाम हैं—क्षेमङ्करः, रिष्टतातिः, शिवतातिः, शिवङ्करः ॥

५. 'श्रद्धालु'के ३ नाम हैं—श्रद्धालुः, आस्तिकः, श्राद्धः ॥

६. 'नास्तिक (परलोकादिको नहीं माननेवालों)का १ नाम है—नास्तिकः ॥

७. 'वैराग्यके योग्य'के २ नाम हैं—वैरङ्गिकः, विरागार्हः ॥

८. 'दम्भरहित'के २ नाम हैं—वीतदम्भः, अकल्कनः ॥

९. 'असम्मत (अनभिमत)'के २ नाम हैं—प्रणाय्यः, असम्मतः ॥

१०. 'खोज करनेवाले'के २ नाम हैं—अन्वेष्टा (-ष्टृ), अनुपदी (-दिन्) ॥

११. 'समर्थ, शक्त'के ४ नाम हैं—सहः, क्षमः, शक्तः, प्रभूष्णुः (+ प्रभविष्णुः) ॥

शेषश्चात्र—क्षमे समर्थोऽलम्भूष्णुः ।

१२. 'भूत (प्रेत, पिशाचादि)से आक्रान्त'के २ नाम हैं—भूतात्तः, आविष्टः ॥

१३. 'शिथिल, ढीला'के २ नाम हैं—शिथिलः, श्लथः ॥

१४. 'संवाहक (पीड़ा आदिके निवारणके लिए शरीरको दबाने या तेल आदिकी मालिश करनेवाले)'के २ नाम हैं—संवाहकः, अङ्गमर्दः ॥

१५. 'वीर्यशून्य (रोग या अवस्था आदिके कारण जिसका वीर्य नष्ट हो गया है, उस)'के २ नाम हैं—नष्टबीजः, निष्कलः ॥

१६. 'बैठे हुए'के २ नाम हैं—आसीनः, उपविष्टः ॥

—१ऊर्ध्वे ऊर्ध्वन्दमः स्थितः ॥ १५६ ॥
२अध्वनीनोऽध्वगोऽन्वन्यः पान्थः पथिकदेशिकौ ।
प्रवासी ३तद्गणो हारिः ४पाथेयं शम्बलं समे ॥ १५७ ॥
५जङ्घालोऽतिजवी ६जङ्घाकरिको जाङ्घिको ७जवी ।
जवनस्त्वरिते ८वेगो रयं रंहस्तरः स्यदः ॥ १५८ ॥
जवो वाजः प्रसरश्च ९मन्दगामी तु मन्थरः ।
१०कामंगाम्यनुकामीनो११ऽत्यन्तीनोऽत्यन्तगामिनि ॥ १५९ ॥
१२सहायोऽभिचरोऽनोश्च जीविगामिचरप्लवाः ।
सेवको१३ऽथ सेवा भक्तिः परिचर्या प्रसादना ॥ १६० ॥
शुश्रूषाऽऽराधनोपास्तिवरिवस्यापरीष्टयः ।
उपचारः—

---

१. 'खड़े हुए'के ३ नाम हैं—ऊर्ध्वः, ऊर्ध्वन्दमः, स्थितः ॥

२. 'पथिक, राही'के ७ नाम हैं—अध्वनीनः, अध्वगः, अध्वन्यः, पान्थः, पथिकः, देशिकः, प्रवासी (– सिन् । + यात्री, – त्रिन्) ॥

३. 'पथिकोंके समूह'का १ नाम है—हारिः ॥

४. 'रास्तेके भोजन'के २ नाम हैं—पाथेयम् , शम्बलम् (पु न) ॥

५. 'अत्यन्त तेज चलनेवाले पथिक'के २ नाम हैं—जङ्घालः, अतिजवी (– विन्) ॥

६. 'जिसकी जीविका राजा आदिके द्वारा इधर-उधर भेजनेसे चलती हो, उस'के २ नाम हैं—जङ्घाकरिकः, जाङ्घिकः (+ जङ्घाकरः) ॥

७. 'तेज चलनेवाले'के ३ नाम हैं—जवी (– विन्), जवनः, त्वरितः (किसीके मतसे 'जङ्घालः' आदि ५ शब्द एकार्थक हैं) ॥

८. 'तेजी, वेग'के ८ नाम हैं—वेगः, रयः, रंहः (– हस्), तरः (– रस् । २ न), स्यदः, जवः, वाजः, प्रसरः ॥

९. 'मन्द चलने या काम करनेवाले'के २ नाम हैं—मन्दगामी (– मिन्), मन्थरः ॥

१०. 'इच्छानुसार चलने या कोई कार्य करनेवाले'के २ नाम हैं—कामंगामी (– मिन्), अनुकामीनः ॥

११. 'अधिक चलनेवाले'के २ नाम हैं—अत्यन्तीनः, अत्यन्तगामी (– मिन्) ॥

१२. 'सेवक'के ७ नाम हैं—सहायः, अभिचरः, अनुजीवी (विन्), अनुगामी (– मिन्), अनुचरः, अनुप्लवः (+ अनुगः), सेवकः ॥

१३. 'सेवा'के १० नाम हैं—सेवा, भक्तिः, परिचर्या, प्रसादना, शुश्रूषा,

—१पदातिस्तु पत्तिः पद्गः पदातिकः ॥ १६१ ॥
पादातिकः पादचारी पादाजिपदिकावपि ।
२सरः पुरोऽग्रतोऽग्रेभ्यः पुरस्तो गमगामिगाः ॥ १६२ ॥
प्रष्ठो३ऽथावेशिकागन्तू प्राघुणोऽभ्यागतोऽतिथिः ।
प्राघूर्णके४ऽथावेशिकमातिथ्यञ्चातिथेय्यपि ॥ १६३ ॥
५सूर्योढस्तु स सम्प्राप्तो यः सूर्येऽस्तङ्गतेऽतिथिः ।
६पादार्थं पाद्य७मर्घार्थमर्घ्यं वार्य८थ गौरवम् ॥ १६४ ॥
अभ्युत्थानं ९व्यथकस्तु स्यान्मर्मस्पृगरुन्तुदः ।
१०ग्रामेयके तु ग्रामीणग्राम्यौ—

आराधना, उपास्तिः (+उपासना), वरिवस्या, परीष्टिः (+पर्येषणा), उपचारः ॥

विमर्श—'अमरसिंह'ने परीष्टि तथा पर्येषणा—इन दो शब्दोंको 'श्राद्धमें ब्राह्मणोंकी सेवा करने' अर्थमें माना है (अमरकोष २।७।३२) ॥

१. 'पैदल'के ८ नाम हैं—पदातिः, पत्तिः, पद्गः, पदातिकः, पादातिकः, पादचारी (– रिन्), पादाजिः, पदिकः ॥

शेषश्चात्र—पादातपदगौ समौ ।

२. 'अग्रगामी (आगे चलनेवाले)'के ७ नाम हैं—पुरःसरः, अग्रतःसरः, अग्रेसरः (+अग्रेगूः), पुरोगमः, पुरोगामी (– मिन्), पुरोगः, प्रष्ठः ॥

३. 'अतिथि'के ६ नाम हैं—आवेशिकः, आगन्तुः (+आगन्तुकः), प्राघुणः, अभ्यागतः, अतिथिः (+आतिथ्यः), प्राघूर्णकः ॥

विमर्श—किसी-किसीने अतिथि तथा अभ्यागतको एकार्थक न मानकर यह भेद बतलाया है कि—जिस महात्माने तिथि-पर्व, उत्सव आदिका त्याग कर दिया है, उसे 'अतिथि' और शेषको 'अभ्यागत' कहते हैं; परन्तु यहाँ उक्त भेदका आश्रय त्यागकर दोनों शब्दोंको एकार्थक ही कहा गया है ॥

४. 'आतिथ्य (अतिथि-सत्कार)'के ३ नाम हैं—आवेशिकम्, आतिथ्यम्, आतिथेयी (स्त्री न) ॥

५. 'सूर्यास्त होनेके उपरान्त आये हुए अतिथि'का १ नाम है—सूर्योढः ॥

६. 'पैर धोनेके लिए दिये जानेवाले जल'का १ नाम है—पाद्यम् ॥

७. 'अर्घके लिए दिये जानेवाले जल'का १ नाम है—अर्घ्यम् ॥

८. 'अतिथि (या—पिता, गुरु आदि श्रेष्ठ जनों)को गौरवप्रदानके लिए उठकर खड़े होने'के २ नाम हैं—गौरवम्, अभ्युत्थानम् ॥

९. 'मर्मस्पर्शी (अत्यधिक कष्ट देनेवाले)'के ३ नाम हैं—व्यथकः, मर्मस्पृक् (– स्पृश्), अरुन्तुदः ॥

१०. 'ग्रामीण, देहाती'के ३ नाम हैं—ग्रामेयकः, ग्रामीणः, ग्राम्यः ॥

—१लोको जनः प्रजा ॥ १६५ ॥
२स्यादामुष्यायणोऽमुष्यपुत्रः प्रख्यातवप्तृकः ।
३कुल्यः कुलीनोऽभिजातः कौलेयकमहाकुलौ ॥ १६६ ॥
जात्यो ४गोत्रन्तु सन्तानोऽन्ववायोऽभिजनः कुलम् ।
अन्वयो जननं वंशः ५स्त्री नारी वनिता वधूः ॥ १६७ ॥
वशा सीमन्तिनी वामा वर्णिनी महिलाऽबला ।
योषा योषिद् ६विशेषास्तु कान्ता भीरुर्नितम्बिनी ॥ १६८ ॥
प्रमदा सुन्दरी रामा रमणी ललनाऽङ्गना ।
७स्वगुणेनोपमानेन मनोज्ञादिपदेन च ॥ १६९ ॥
विशेषिताङ्गकर्मा स्त्री यथा तरललोचना ।
अलसेक्षणा मृगाक्षी मत्तेभगमनाऽपि च ॥ १७० ॥
वामाक्षी सुस्मिता—

---

१. 'प्रजा, जन'के ३ नाम है—लोकः, जनः, प्रजा ॥

२. 'विख्यात पितावाले'के ३ नाम हैं—आमुष्यायणः, अमुष्यपुत्रः, प्रख्यातवप्तृकः ॥

३. 'कुलीन (उत्तम वंशमें उत्पन्न)'के ६ नाम हैं—कुल्यः, कुलीनः, अभिजातः, कौलेयकः, महाकुलः, जात्यः ॥

४. 'वंश, कुल'के ८ नाम हैं—गोत्रम्, सन्तानः (+सन्ततिः), अन्ववायः, अभिजनः, कुलम्, अन्वयः, जननम्, वंशः ॥

५. 'नारी, स्त्री'के १२ नाम हैं—स्त्री, नारी, वनिता, वधूः, वशा, सीमन्तिनी, वामा, वर्णिनी, महिला (+महेला), अबला, योषा, योषित् (+योषिता) ॥

६. 'ये स्त्रियोंके विभिन्न भेद-विशेष'हैं—कान्ता, भीरुः, नितम्बिनी, प्रमदा, सुन्दरी, रामा, रमणी, ललना, अङ्गना ॥

७. 'अङ्गों या कार्योंके गुण या उपमानसे तथा 'मनोज्ञ' आदि (आदि' पदसे 'वाम, विशाल,……'का संग्रह है) विशेषित अङ्गों (यथा—लोचन, ईक्षण) तथा कार्यों (यथा—गमन, स्मित,……)वाली स्त्री के विभिन्न पर्याय होते हैं—क्रमशः उदा० यथा—"तरललोचना, अलसेक्षणा, मृगाक्षी, मत्तेभगमना, वामाक्षी, सुस्मिता" (इनमेंसे क्रमशः १-१ नाम 'चञ्चल नेत्रोंवाली, आलसयुक्त नेत्रोंवाली, मृगके समान नेत्रोंवाली, मतवाले हाथीके समान चालवाली, सुन्दर नेत्रोंवाली और सुन्दर मुस्कानवाली स्त्री"का है ।

विमर्श—उक्त ६ पर्यायोंमेसे 'तरललोचना' पदमें 'तरलता नेत्रका असाधारण अपना (नेत्रका) गुण है, 'अलसेक्षणा' पदमें नेत्रका 'ईक्षण' अर्थात् 'देखना' रूप कार्यकी अलसता' असाधारण अपना (नेत्रका) गुण है,

—१अस्याः स्वं मानलीलास्मरादयः ।
२लीला विलासो विच्छित्तिर्विब्बोकः किलिकिञ्चितम् ॥ १७१ ॥
मोटायितं कुट्टमितं ललितं विहृतन्तथा ।
विभ्रमश्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश ॥ १७२ ॥
३प्रागल्भ्यौदार्यमाधुर्यशोभाधीरत्वकान्तयः ।
दीप्तिश्चायत्नजाः—

'मृगाक्षी' पदमें मृगके नेत्ररूप 'उपमान'से स्त्रीका अक्षि (नेत्र) रूप अङ्ग विशेषित हुआ है, 'मत्तेभगमना' पदमें 'उपमान' रूप मत्तेभगमन (मतवाले हाथीकी चाल) से स्त्रीका गमन विशेषित है, 'वामाक्षी'पदमें 'वामत्व' (सुन्दरता)से 'नेत्र' रूपी स्त्रीका अङ्ग विशेषित है और 'सुस्मिता' पदमें 'सु'के अर्थ 'शोभनत्व'से 'स्मित' रूपी कर्म विशेषित है । इसी प्रकार "वरारोहा, वरवर्णिनी, प्रतीपदर्शिनी,·········"नामोंके विषयमें तर्क करना चाहिए ॥

१. इस स्त्रीके धन 'मानः' लीला, स्मरः, (स्वाभिमान, लीला, काम) आदि ('आदि शब्दसे 'मनोविलास' आदिका संग्रह है) हैं । अतएव 'मानिनी लीलावती, स्मरवती, (मान, लीला तथा स्मरवाली) आदि यौगिक नाम स्त्रियोंके होते हैं ॥

२. स्त्रियोंके स्वभावसिद्ध १० अलङ्कार होते हैं, उनका क्रमशः अर्थ-सहित वक्ष्यमाण १—१ नाम है—लीला (वचन, वेष तथा चेष्टादिसे प्रियतमका अनुकरण करना), विलासः (स्थान तथा गमनादिकी विशिष्टता), विच्छित्तिः (शोभाजन्य गर्वसे थोड़ा भूषणादि धारण करना), विब्बोकः (सौभाग्यके दर्पसे इष्ट वस्तुओंमें अवज्ञा रखना), किलकिञ्चितम् (सौभाग्यादिसे मुस्कान आदिका संमिश्रण), मोटायितम् (प्रियकथा-प्रसङ्गमें तद्भाव की भावनासे उत्पन्न कान खुजलाना आदि चेष्टा), कुट्टमितम् (+ कुट्टमितम् अधरादि क्षतकालमें हर्ष होनेपर भी हाथ या मस्तकादिके कम्पन द्वारा निषेध करते हुए निषेध का प्रदर्शन), ललितम् (सुकुमारता पूर्वक अङ्गन्यास अर्थात् गमन आदि), विहृतम् (बोलने आदिके अवसरपर भी चुप रहना), विभ्रमः (प्रियतम के आने पर हर्षादिके कारण विभूषणोंका उलटा-पुलटा (अस्थानमें) धारण करना) ॥

विमर्श—'साहित्यदर्पण'कार 'विश्वनाथ'ने उक्त 'दश अलङ्कारोंके अतिरिक्त स्त्रियोंके और भी ८ स्वभावसिद्ध अलङ्कार कहे हैं, यथा—मदः, तपनम, मौग्ध्यम्, विक्षेपः, कुतूहलम, हसितम्, चकितम, केलिः ॥

३. वक्ष्यमाण ७ अलङ्कार स्त्रियोंके अयत्नज (बिना प्रयत्न-विशेषके होनेवाले) हैं, उनका अर्थ सहित १—१ नाम है, यथा-प्रागल्भ्यम् (ढिठाई, निर्भयता), औदार्यम् (अमर्षादिके अवसरपर भी नम्रता), माधुर्यम्

—१भावहावहेलास्त्रयोऽङ्गजाः ॥ १७३ ॥
२सा कोपना भामिनी स्या ३च्छेका मत्ता च वाणिनी।
४कन्या कनी कुमारी च ५गौरी तु नग्निकाऽरजाः ॥१७४॥
६मध्यमा तु दृष्टरजास्तरुणी युवतिश्चरी।
तलुनी दिक्करी ७वर्या पतिंवरा स्वयंवरा ॥ १७५ ॥
८सुवासिनी वधूटी स्याच्चिरिण्ट्य—

(क्रोधादिके अवसरमें भी मधुर चेष्टा होना), शोभा (रूप, यौवन, सौन्दर्य आदि से अङ्गों का शोभित होना), धीरत्वम् (अचपलता), कान्तिः (काम द्वारा उक्त 'शोभा' का बढना), दीप्तिः (उक्त 'कान्ति' का ही अत्यधिक बढना) ॥

१. वक्ष्यमाण ३ अलङ्कार स्त्रियोंके 'अङ्गज' होते हैं, उनका अर्थ सहित क्रमशः वक्ष्यमाण १-१ नाम है—भावः (कामजन्य विकारस शून्य शरीरमें थोड़ा कामज विकार होना), हावः (कटाक्षादिसे सुरतेच्छाके प्रकाशनसे कुछ-कुछ लक्षित होनेवाला भाव), हेला (उक्त हावका अधिक प्रकाशन) ॥

विमर्श—इन २० (विश्वनाथसम्मत २८) अलङ्कारोंके विस्तृत लक्षण तथा उदाहरण साहित्यदर्पण (३।१३०–१५७) में जिज्ञासुओंको देखना चाहिए ॥

२. 'क्रोधशीला स्त्री'का १ नाम है—भामिनी (+कोपना) ॥

३. 'चतुर एवं मत्त स्त्री'का १ नाम है—वाणिनी ॥

४. 'कन्या (क्वारी स्त्री')के ३ नाम हैं—कन्या, कनी, कुमारी ॥

५. 'जिसका रजोधर्म (मासिक धर्म) आरम्भ नहीं हुआ हो उस स्त्री' के ३ नाम हैं—गौरी, नग्निका, अरजाः (–जस्) ॥

विमर्श – 'अष्टवर्षा भवेद् गौरी दशमे नग्निका भवेत्' अर्थात् ८ वर्षकी कन्या 'गौरी' और १० वर्षकी कन्या 'नग्निका' संज्ञक है, इस धर्मशास्त्रोक्त भेदका आश्रय यहाँ नहीं किया गया है ॥

६. 'तरुणी' (नौजवान) स्त्री'के ७ नाम हैं—मध्यमा, दृष्टरजाः (– जस्), तरुणी, युवतिः, चरी, तलुनी, दिक्करी ॥

७. 'पतिको स्वयं वरण करनेवाली स्त्री'के ३ नाम हैं—वर्या, पतिंवरा, स्वयंवरा ॥

८. 'आरम्भमें होनेवाले युवावस्थाके लक्षणोंवाली विवाहिता स्त्री'के ३ नाम हैं—सुवासिनी (+स्ववासिनी), वधूटी (+वध्वटी), चिरिण्टी (+चिरण्टी, चरिण्टी, चरण्टी) ॥

—१थ सधर्मिणी।

पत्नी सहचरी पाणिगृहीती गृहिणी गृहाः॥ १७६॥

दाराः क्षेत्रं वधूर्भार्या जनी जाया परिग्रहः।

द्वितीयोढा कलत्रञ्च२पुरन्ध्री तु कुटुम्बिनी॥ १७७॥

३प्रजावती भ्रातृजाया ४सूनोः स्नुषा जनी वधूः।

५भ्रातृवर्गस्य या जाया यातरस्ताः परस्परम्॥ १७८॥

६वीरपत्नी वीरभार्या ७कुलस्त्री कुलबालिका।

८प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया॥ १७९॥

हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा।

९प्रेयस्याद्याः पुंसि पत्यौ भर्ता सेक्ता पतिर्वरः॥ १८०॥

विवोढा रमणो भोक्ता रुच्यो वरयिता धवः।

---

१. 'सविधि विवाहिता स्त्री'के १६ नाम हैं—सधर्मिणी (+सधर्मचारिणी), पत्नी, सहचरी, पाणिगृहीती (+करात्ती), गृहिणी (+गेहिनी), गृहाः (नि पु ब० व०), दाराः (नि पु ब० व०।+ए० व०, यथा—"धर्मप्रजासम्पन्ने दारे नान्यं कुर्वीत"), क्षेत्रम्, वधूः, भार्या, जनी, जाया, परिग्रहः, द्वितीया, ऊढा, कलत्रम्॥

२. 'पुत्र, नौकर आदिवाली स्त्री'के २ नाम हैं—पुरन्ध्री, कुटुम्बिनी॥

३. 'भौजाई, भाभी'के २ नाम हैं—प्रजावती, भ्रातृजाया॥

४. 'पतोहू (पुत्र या—भतीजे आदि की स्त्री)'के ३ नाम हैं—स्नुषा, जनी, वधूः (+वधूटी)॥

५. परस्परमें भाइयोंकी स्त्रियाँ 'यातरः' (-तृ), अर्थात् 'याता' कहलाती हैं॥

६. 'वीरपत्नी'के २ नाम हैं—वीरपत्नी, वीरभार्या॥

७. 'कुलीन स्त्री'के २ नाम हैं—कुलस्त्री, कुलबालिका (+कुलपालिका)॥

८. 'प्रिया स्त्री'के १० नाम हैं—प्रेयसी, दयिता, कान्ता, प्राणेशा, वल्लभा, प्रिया, हृदयेशा, प्राणसमा, प्रेष्ठा, प्रणयिनी॥

९. उक्त 'प्रेयसी' आदि १० शब्द 'पुंल्लिङ्ग' होने पर (यथा—प्रेयान् (-यस्), दयितः, कान्तः, प्राणेशः, वल्लभः, प्रियः, हृदयेशः, प्राणसमः, प्रेष्ठः, प्रणयी (-यिन्) और 'भर्ता (-र्तृ), सेक्ता (क्तृ), पतिः, वरः, विवोढा (-ढृ। यौ०—परिणेता-तृ, परिग्राहः, उपयन्ता (-न्तृ······) रमणः, भोक्ता (-क्तृ), रुच्यः, वरयिता (तृ), धवः'—ये १० नाम (कुल १०+१०=२० नाम) 'पति'के हैं॥

१जन्यास्तु तस्य सुहृदो २विवाहः पाणिपीडनम् ॥ १८१ ॥
पाणिग्रहणमुद्वाह उपाद् यामयमावपि ।
दारकर्म परिणयो ३जामाता दुहितुः पतिः ॥ १८२ ॥
४उपपतिस्तु जारः स्याद्५भुजङ्गो गणिकापतिः ।
६जम्पती दम्पती जायापती भार्यापती समाः ॥ १८३ ॥
७यौतकं युतयोर्देयं सुदायो हरणञ्च तत् ।
८कृताभिषेका महिषी९भोगिन्योऽन्या नृपस्त्रियः ॥ १८४ ॥
१०सैरन्ध्री याऽन्यवेश्मस्था स्वतन्त्रा शिल्पजीविनी ।
११अशिक्न्यन्तःपुरप्रेष्या १२दूतीसञ्चारिके समे ॥ १८५ ॥

---

१. 'पतिके मित्रों'का १ नाम है—जन्याः ॥

२. 'विवाह'के ८ नाम हैं—विवाहः पाणिग्रहणम्, उद्वाहः, उपयामः, उपयमः, दारकर्म (-र्मन्), परिणयः ॥

शेषश्चात्र—जाम्बूलमालिकोद्वाहे वरयात्रा तु दौन्दुभी ।
गोपाली वर्णके शान्तियात्रा वरनिमन्त्रणे ।
स्यादिन्द्राणी महे हेलिरुल्लुलुर्मङ्गलध्वनिः ॥
स्यात्तु स्वस्त्ययनं पूर्णकलशे मङ्गलाह्निकम् ।
शान्तिके मङ्गलस्नानं वारिपल्लववारिणा ॥
हस्तलेपे तु करणं हस्तबन्धे तु पीडनम् ।
तच्छेदे समवभ्रंशो धूलिभक्ते तु वातिकम् ॥

३. 'दामाद, जामाता'का १ नाम है—जामाता (-तृ) ॥

४. जार (पतिसे भिन्न स्त्रीका प्रेमी)'के २ नाम हैं—उपपतिः, जारः ॥

५. 'वेश्याके पति'का १ नाम है—भुजङ्गः (+गणिकापतिः) ॥

६. 'पति तथा पत्नी (सम्मिलित दोनोंकी जोड़ी)'के ४ नाम हैं—जम्पती, दम्पती, जायापती, भार्यापती (नि० द्वि०) ॥

७. 'दहेज'के ३ नाम हैं—यौतकम्, सुदायः (+दायः), हरणम् ॥

८. 'पटरानी'का १ नाम है—महिषी ॥

९. 'अन्य राजपत्नियों'का १ नाम है—भोगिनी ॥

१०. 'दूसरेके घरमें रहती हुई स्वतन्त्र, सब कलाओंमें निपुण तथा राजपत्नियों आदिका शृङ्गारकर जीविका चलानेवाली स्त्री'का १ नाम है—सैरन्ध्री ॥

११. 'रनिवासकी दासियों'का १ नाम है—असिक्नी ॥

१२. 'दूती'के २ नाम हैं—दूती, संचारिका ॥

१प्रज्ञा प्राज्ञी प्रज्ञावत्यां २प्राज्ञा तु प्रज्ञयाऽन्विता।
३स्यादाभीरी महाशूद्री जातिपुंयोगयोः समे ॥ १८६ ॥
४पुंयुज्याचार्याचार्य्यानी ५मातुलानी तु मातुली।
६उपाध्यायान्युपाध्यायी ७क्षत्रियर्यी च शूद्र्यपि॥ १८७ ॥
८स्वत आचार्या शूद्रा च ९क्षत्रिया क्षत्रियाण्यपि।
१०उपाध्याय्युपाध्याया स्या११दर्याऽर्याण्यौ पुनः समे ॥ १८८ ॥
१२दिधिषूस्तु पुनर्भूर्द्विरूढा१३ऽस्या दिधिषूः पतिः।
१४स तु द्विजोऽग्रेदिधिषूर्यस्य स्यात्सैव गेहिनी ॥ १८९ ॥

---

१. 'जानकार स्त्री'के २ नाम हैं—प्रज्ञा, प्राज्ञी ॥

२. 'विशिष्ट बुद्धिमती स्त्री'का १ नाम है—प्राज्ञा ॥

३. 'आभीर (ग्वाले)की स्त्री या आभीर जातिमें उत्पन्न स्त्री'का १ नाम 'आभीरी' और 'महाशूद्रकी स्त्री या महाशूद्र जातिमें उत्पन्न स्त्री'का १ नाम 'महाशूद्री' है ॥

४. 'आचार्यकी पत्नी'के २ नाम हैं—आचार्यी, आचार्यानी ॥

५. 'मामी (मामाकी स्त्री)'के २ नाम हैं—मातुलानी, मातुली ॥

६. 'उपाध्यायकी स्त्री'के २ नाम हैं—उपाध्यायानी, उपाध्यायी ॥

७. 'क्षत्रिय तथा शूद्रकी (अन्यजात्युत्पन्न भी) स्त्री'का क्रमशः १-१ नाम है—क्षत्रियी, अर्यी ॥

८. 'पतिके आचार्य नहीं होनेपर भी स्वयं आचार्याका काम करनेवाली स्त्री'का १ नाम 'आचार्या' तथा 'पतिके शूद्रजातीय नहीं होनेपर भी स्वयं शूद्रजात्युत्पन्न स्त्री'का १ नाम 'शूद्रा' है ॥

९. 'पतिके क्षत्रिय होनेपर भी स्वयं क्षत्रिय-जात्युत्पन्न स्त्री'के २ नाम हैं—क्षत्रिया, क्षत्रियाणी ॥

१०. 'पतिके उपाध्याय नहीं होनेपर भी स्वयं उपाध्यायाका कार्य करनेवाली स्त्री'के २ नाम हैं—उपाध्यायी, उपाध्याया ॥

११. 'पतिके वैश्य नहीं होनेपर भी स्वयं वैश्यजातीय स्त्री'के २ नाम हैं—अर्या, अर्याणी ॥

१२. 'दोबार विवाहिता (विधवा होनेपर विवाहकी हुई स्त्री)'के ३ नाम हैं—दिधिषूः (+दिधीषूः), पुनर्भूः, द्विरूढा ॥

१३. 'दोबार विवाहिता स्त्रीके पति'का १ नाम है—दिधिषूः ॥

१४. 'दूसरी बार विवाहिता जिसकी धर्मपत्नी हो, उस द्विज (ब्राह्मण, क्षत्रिय या वैश्य) पति'का १ नाम है—अग्रेदिधिषूः ॥

१ज्येष्ठेऽनूढे परिवेत्ताऽनुजो दारपरिग्रही ।
२तस्य ज्येष्ठः परिवित्तिः३र्जाया तु परिवेदिनी ॥ १६० ॥
४वृषस्यन्ती कामुकी स्या५दिच्छायुक्ता तु कामुका ।
६कृतसापत्निकाऽध्यूढाऽधिविन्ना७ऽथ पतिव्रता ॥ १६१ ॥
एकपत्नी सुचरित्रा साध्वी सत्य८सतीत्वरी ।
पुंश्चली चर्षणी बन्ध्यक्यविनीता तु पांसुला ॥ १६२ ॥
स्वैरिणी कुलटा ९याति या प्रियं साऽभिसारिका ।
१०वयस्यालिः सखी सध्रीच्य११शिश्वी तु शिशुं विना ॥ १६३ ॥
१२पतिवत्नी जीवत्पति१३र्विश्वस्ता विधवा समे ।

---

१. 'जेठे भाईके अविवाहित रहनेपर विवाहित छोटे भाई'का १ नाम है—परिवेत्ता (– त्तृ) ॥

२. 'विवाहित छोटे भाईका अविवाहित जेठा भाई'का १ नाम है—परिवित्तिः ॥

३. 'परिवेत्ता (अविवाहित बड़े भाईके विवाहित छोटे भाईकी पत्नी)'का १ नाम है—परिवेदिनी ॥

४. 'वृषतुल्य मैथुनकी इच्छा करनेवाली स्त्री'के २ नाम हैं—वृषस्यन्ती, कामुकी ॥

५. 'सामान्यतः मैथुनेच्छा करनेवाली स्त्री'का १ नाम है—कामुका ॥

६. 'सपत्नी (सौत) वाली स्त्री'के ३ नाम हैं—कृतसापत्निका, अध्यूढा, अधिविन्ना ॥

७. 'पतिव्रता स्त्री'के ५ नाम हैं—पतिव्रता, एकपत्नी, सुचरित्रा, साध्वी, सती ॥

८. 'व्यभिचारिणी स्त्री'के ६ नाम हैं—असती, इत्वरी, पुंश्चली, चर्षणी, बन्धकी, अविनीता, पांसुला, स्वैरिणी, कुलटा ॥

शेषश्चात्र—कुलटायां तु दुःशृङ्गी बन्धुदा फलकूणिका ।
धर्षणी लाञ्छनी खण्डशीला मदननालिका ॥
त्रिलोचना मनोहारी ।

९. 'अभिसारिका (संकेतित स्थानपर पतिके पास काम-वशीभूत होकर जानेवाली या पतिको बुलानेवाली स्त्री)'का १ नाम है—अभिसारिका ॥

१०. 'सखी-सहेली'के ४ नाम हैं—वयस्या, आलिः, सखी, सध्रीची ॥

११. 'सन्तानहीन स्त्री'का १ नाम है—अशिश्वी ॥

१२. 'सधवा स्त्री'के २ नाम हैं—पतिवत्नी, जीवत्पतिः (+सधवा) ॥

१३. 'विधवा स्त्री'के २ नाम हैं—विश्वस्ता, विधवा ॥

१निर्वीरा निष्पतिसुता २जीवत्तोका तु जीवसूः ॥ १९४ ॥
३नश्यत्प्रसूतिका निन्दुः ४सश्मश्रुर्नरमालिनी ।
५कात्यायनी त्वर्द्धवृद्धा काषायवसनाऽधवा ॥ १९५ ॥
६श्रवणा भिक्षुकी मुण्डा ७पोटा तु स्त्रीनृलक्षणा ।
८साधारणस्त्री गणिका वेश्या पण्यपणाङ्गना ॥ १९६ ॥
भुजिष्या लञ्जिका रूपाजीवा ९वारवधूः पुनः ।
सा वारमुख्या १०ऽथ चुन्दी कुट्टनी शम्भली समाः ॥ १९७ ॥
११पोटा वोटा च चेटी च दासी च कुटहारिका ।
१२नग्ना तु कोटवी १३वृद्धा पलिक्न्य१४थ रजस्वला ॥ १९८ ॥
पुष्पवत्यधिरात्रेयी स्त्रीधर्मिणी मलिन्यवीः ।
उदक्या ऋतुमती च—

---

१. 'पति-पुत्रसे हीन स्त्री'के २ नाम हैं-निर्वीरा (+अवीरा), निष्पतिसुता ॥

२. जिसकी सन्तान जीवित रहती हो, उस स्त्री'के २ नाम हैं—जीवत्तोका, जीवसूः ॥

३. 'जिसकी सन्तान मर जाती हो, उस स्त्री'के २ नाम हैं—निन्दुः, नश्यत्प्रसूतिका ॥

४. 'जिस स्त्रीके दाढ़ी या मूंछके बाल हों उस'के २ नाम हैं—सश्मश्रुः, नरमालिनी ॥

५. 'गेरुआ कपड़ा पहननेवाली अधबूढ़ा विधवा स्त्री'का १ नाम है—कात्यायनी ॥

६. 'भिक्षुकी स्त्री'के ३ नाम हैं—श्रवणा (+श्रमणा), भिक्षुकी, मुण्डा ॥

शेषश्चात्र—श्रवणायां भिक्षुकी स्यात् ।

७. 'पुरुषके लक्षणोंसे युक्त स्त्री'के २ नाम हैं—पोटा, स्त्रीनृलक्षणा ॥

८. वेश्या'के ८ नाम हैं—साधारणस्त्री, गणिका, वेश्या, पण्याङ्गना पणाङ्गना, भुजिष्या, लञ्जिका, रूपाजीवा ॥

शेषश्चात्र—वेश्यायां तु खगालिका । वारवाणिः कामलेखा क्षुद्रा ।

९. 'सेवामें नियुक्त वेश्या'के २ नाम हैं—वारवधूः, वारमुख्या ॥

१०. 'कुटिनी'के ३ नाम हैं—चुन्दी, कुट्टनी, शम्भली ॥

११. 'दासी'के ५ नाम हैं—पोटा, वोटा, चेटी, दासी, कुटहारिका ॥

शेषश्चात्र—चेट्यां गणेरुका । वडवा कुम्भदासी च ।

१२. 'नग्न स्त्री'के २ नाम हैं—नग्ना (+नग्निका), कोटवी ॥

१३. 'बुढ़िया'के २ नाम हैं—वृद्धा, पलिक्नी ॥

१४. 'रजस्वला, ऋतुमती स्त्री'के ९ नाम हैं—रजस्वला, पुष्पवती

—१पुष्पहीना तु निष्कला ॥ १९९ ॥

२राका तु सरजाः कन्या ३स्त्रीधर्मः पुष्पमार्तवम् ।

रज४स्तत्कालस्तु ऋतुः ५सुरतं मोहनं रतम् ॥ २०० ॥

संवेशनं संप्रयोगः संभोगश्च रहो रतिः ।

ग्राम्यधर्मो निधुवनं कामकेलिः पशुक्रिया ॥ २०१ ॥

व्यवायो मैथुनं६ स्त्रीपुंसौ द्वन्द्वं मिथुनञ्च तत् ।

७अन्तर्वत्नी गुर्विणी स्याद् गर्भवत्युदरिण्यपि ॥ २०२ ॥

आपन्नसत्त्वा गुर्वी च ८श्रद्धालुर्दोहदान्विता ।

९विजाता च प्रजाता च जातापत्या प्रसूतिका ॥ २०३ ॥

१०गर्भस्तु गरभो भ्रूणो दोहदलक्षणञ्च सः ।

११गर्भाशयो जरायूल्बे —

(+पुष्पिता), आधः, आत्रेयी, स्त्रीधर्मिणी, मालिनी, अवीः, उदक्या, ऋतुमती ॥

१. 'जिसका मासिक धर्म नहीं होता हो, उस स्त्री'के २ नाम हैं—निष्कला, पुष्पहीना ॥

२. 'रजस्वला क्वाँरी कन्या'का १ नाम है—राका ॥

३. 'रज, ऋतुधर्म'के ४ नाम हैं—स्त्रीधर्मः, पुष्पम्, आर्तवम्, रजः (-जस्, न) ॥

४. 'स्त्रियोंके मासिक धर्म होनेके समय'का १ नाम है—ऋतुः ॥

५. 'रति, मैथुन'के १४ नाम हैं—सुरतम्, मोहनम्, रतम्, संवेशनम्, संप्रयोगः, संभोगः, रहः, रतिः, ग्राम्यधर्मः, निधुवनम्, कामकेलिः, पशुक्रिया (+पशुधर्मः), व्यवायः, मैथुनम् ॥

६. 'स्त्री-पुरुषों की जोड़ी'के ३ नाम हैं—स्त्रीपुंसौ (नि द्वि), द्वन्द्वम्, मिथुनम् ॥

७. 'गर्भवती'के ६ नाम हैं—अन्तर्वत्नी, गुर्विणी, गर्भवती, उदरिणी, आपन्नसत्त्वा, गुर्वी ॥

८. 'गर्भके समय किसी विशेष वस्तुके खाने, देखने आदिकी इच्छा करनेवाली स्त्री'के २ नाम हैं—श्रद्धालुः, दोहदान्विता ॥

९. 'प्रसूती (प्रसव की हुई) स्त्री'के ४ नाम हैं—विजाता, प्रजाता, जातापत्या, प्रसूतिका ॥

१०. 'गर्भ'के ४ नाम हैं—गर्भः, गरभः, भ्रूणः, दोहदलक्षणम् (न) ॥

११. 'गर्भाशय'के ३ नाम हैं—गर्भाशयः, जरायुः (पु), उल्बम् (पु न) ॥

—१कललोल्बे पुनः समे ॥ २०४ ॥
२दोहदं दौर्हृदं श्रद्धा लालसा ३सूतिमासि तु ।
वैजननो ४विजननं प्रसवो ५नन्दनः पुनः ॥ २०५ ॥
उद्वहोऽङ्गात्मजः सूनुस्तनयो दारकः सुतः ।
पुत्रो ६दुहितरि स्त्रीत्वे ७तोकापत्यप्रसूतयः ॥ २०६ ॥
तुक् प्रजोभयो८र्भ्रात्रीयो भ्रातृव्यो भ्रातुरात्मजे ।
९स्वस्रीयो भागिनेयश्च जामेयः कुतपश्च सः ॥ २०७ ॥
१०नप्ता पौत्रः पुत्रपुत्रो ११दौहित्रो दुहितुः सुतः ।

---

१. 'वीर्य तथा रजके संयोग'के २ नाम हैं—कललम्, उल्बम् (२ पुन) ॥

२. 'दोहद, गर्भकालमें होनेवाली इच्छा'के ४ नाम हैं—दोहदम्, (पु न), दौर्हृदम्, श्रद्धा, लालसा (पु न) ।

विमर्श—अमरसिंहने सामान्य इच्छाको 'दोहद' तथा प्रबल इच्छाको 'लालसा' कहा है (अ० को० १।७।२७—२८ ॥

३. 'प्रसवका महीना (दशम मास)'का १ नाम है—वैजननः ॥

४. 'प्रसव'के २ नाम हैं—विजननम्, प्रसवः ॥

५. 'पुत्र'के ९ नाम हैं—नन्दनः, उद्वहः, अङ्गजः (+तनुजः, तनूजः, देहजः,………), आत्मजः, सूनुः, तनयः, दारकः, सुतः, पुत्रः ॥

शेषश्चात्र—पुत्रे तु कुलधारकः । स दायादो द्वितीयश्च ।

६. पूर्वोक्त नन्दन आदि ९ शब्द स्त्रीलिङ्ग होनेपर 'पुत्री'के पर्याय होते हैं (यथा—नन्दना, उद्वहा, अङ्गजा (+तनुजा, तनूजा, देहजा,………) आत्मजा, सूनुः, तनया, दारिका, सुता, पुत्री) । तथा 'दुहितृ' (–तृ) शब्द भी पुत्री का वाचक है ॥

शेषश्चात्र—पुत्र्यां धीदा समर्धुका । देहसंचारिणी चापि ।

७. 'सन्तान (पुत्र या पुत्री)'के ५ नाम हैं—तोकम् , अपत्यम् , प्रसूतिः, तुक् , प्रजा ॥

शेषश्चात्र—अपत्ये संतानसंतती ।

८. 'भतीजा (भाई का लड़का)'के २ नाम हैं—भ्रात्रीयः, भ्रातृव्यः, (+भ्रातृजः) ॥

९. 'भानजा (बहनका लड़का)'के ४ नाम हैं—स्वस्रीयः, भागिनेयः, जामेयः, कुतपः ॥

१०. 'पोता (लड़केका लड़का)'के २ नाम हैं—नप्ता (प्तृ), पौत्रः ॥

११. 'धेवता (पुत्रीका लड़का)'का एक नाम है—दौहित्रः ॥

१प्रतिनप्ता प्रपौत्रः स्यात्२तत्पुत्रस्तु परम्परः ॥ २०८ ॥
३पैतृष्वसेयः स्यात्पैतृष्वस्रीयस्तुक् पितृष्वसुः ।
४मातृष्वस्रीयस्तुङ्मातृष्वसुर्मातृष्वसेयवत् ॥ २०९ ॥
५विमातृजो वैमात्रेयो ६द्वैमातुरो द्विमातृजः ।
७सत्यास्तु तनये सांमातुरवद्भाद्रमातुरः ॥ २१० ॥
८सौभागिनेयकानीनौ सुभगाकन्ययोः सुतौ ।
९पौनर्भवपारस्त्रैणेयौ पुनर्भूपरस्त्रियोः ॥ २११ ॥
१०दास्या दासेरदासेयौ ११नाटेरस्तु नटीसुतः ।
१२बन्धुलो बान्धकिनेयः कौलटेरोऽसतीसुतः ॥ २१२ ॥
१३स तु कौलटिनेयः स्याद्यो भिक्षुकसतीसुतः ।
१४द्वावप्येतौ कौलटेयौ—

---

१. परपोता (पौत्रका पुत्र)'के २ नाम हैं—प्रतिनप्ता (-प्तृ), प्रपौत्रः ॥

२. 'छरपोता (परपोतेका पुत्र)'का १ नाम है—परम्परः ॥

३. 'पैतृष्वसेय (फूआ + (पिताकी बहन)का लड़का)'के २ नाम हैं—पैतृष्वसेयः, पैतृष्वस्रीयः ॥

४. 'मातृष्वसेय (मौसी का लड़का)'के २ नाम हैं—मातृष्वस्रीयः, मातृष्वसेयः ॥

५. 'सौतेले भाई (विमाताका लड़का)'के २ नाम हैं—विमातृजः, वैमात्रेयः ॥

६. 'दो माताओंका पुत्र'के २ नाम हैं—द्वैमातुरः, द्विमातृजः ॥

७. 'पतिव्रताका पुत्र'के २ नाम हैं—सांमातुरः, भाद्रमातुरः, ॥

८. 'सधवा तथा क्वाँरी (अविवाहिता कन्या)के पुत्रों'के क्रमशः १-१ नाम हैं—सौभागिनेयः, कानीनः ॥

९. 'दुबारा व्याही गयी तथा परायी स्त्रीके पुत्रों'का क्रमशः १-१ नाम है—पौनर्भवः, पारस्त्रैणेयः ॥

१०. 'दासीका पुत्र'के २ नाम हैं—दासेरः, दासेयः ॥

११. 'नटीका पुत्र'के २ नाम हैं—नाटेरः नटीसुतः (+नाटेयः) ॥

१२. 'व्यभिचारिणीका पुत्र'के ३ नाम हैं—बन्धुलः, बान्धकिनेयः, कौलटेरः (+असतीसुतः) ॥

१३. 'भिक्षा माँगनेवाली सती स्त्रीका पुत्र'का १ नाम है—कौलटिनेयः ॥

१४. 'कुलटा' (उक्त दोनों स्त्रियों—व्यभिचारिणी तथा भिक्षा माँगनेवाली सती स्त्रीका पुत्र)'का १ नाम और है—कौलटेयः ॥

—१क्षेत्रजो देवरादिजः ॥ २१३ ॥
२स्वजाते त्वौरसोरस्यौ ३मृते भर्तरि जारजः ।
गोलको४ऽथामृते कुण्डो ५भ्राता तु स्यात्सहोदरः ॥ २१४ ॥
समानोदर्यसोदर्यसगर्भसहजा अपि ।
सोदरश्च—

१. 'नियोग द्वारा देवर आदिसे उत्पन्न पुत्र'का १ नाम है—क्षेत्रजः[1] ॥

विमर्श—मरे हुए, असाध्य रोगवाले या नपुंसक पतिकी स्त्रीमें सन्तान-क्षय होनेकी अवस्था हो तब देवर या सपिण्ड के साथ सम्भोग द्वारा उत्पन्न सन्तान "क्षेत्रज" कहलाता है, इस विधिको 'नियोग' कहते हैं। 'नियोग' विधिसे सन्तान उत्पन्न करनेकी आज्ञा मनु भगवान्ने भी दी है[2]। परन्तु कलियुगमें नियोग द्वारा सन्तानोत्पत्ति करनेका कुछ शास्त्रकारोंने निषेध किया है[3] ॥

२. 'औरस (निजी) पुत्र'के २ नाम हैं—औरसः, उरस्यः ॥

३. पतिके मरनेपर जार (उपपति)से उत्पन्न पुत्र'का १ नाम है—गोलकः ॥

४. 'पतिके जीवित रहते जार (उपपति)से उत्पन्न पुत्र'का १ नाम है—कुण्डः ॥

५. 'सहोदर भाई'के ७ नाम हैं—भ्राता (–तृ), सहोदरः, समानोदर्यः, सोदर्यः, सगर्भः, सहजः, सोदरः ॥

१. यथाऽऽह मनुः—
"यस्तल्पजः प्रतीतस्य क्लीबस्य व्याधितस्य वा ।
स्वधर्मेण नियुक्तायां स पुत्रः 'क्षेत्रजः' स्मृतः ॥" इति ।

मनु० ९।१६७

२. तद्यथा—"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथञ्चन ॥"

मनु० ९।५९–६०

३. तथा चोक्तम्—"अश्वालम्भं गवालम्भं संन्यासं पलपैतृकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥"
परं संन्यासार्थमपवादोऽपि दृश्यते । तद्यथा—
"यावद् गङ्गा च गोदा च यावच्चन्द्रदिवाकरौ ।
अग्निहोत्रञ्च संन्यासः कलौ तावत्प्रवर्तते ॥" इति ।

—१स तु ज्येष्ठः स्यात्पित्र्यः पूर्वजोऽग्रजः ॥ २१५ ॥
२जघन्यजे यविष्ठः स्यात्कनिष्ठोऽवरजोऽनुजः ।
स यवीयान् कनीयांश्च ३पितृव्यश्यालमातुलाः ॥ २१६ ॥
पितुः पत्न्याश्च मातुश्च भ्रातरो ४देवृदेवरौ ।
देवा चावरजे पत्युर्५जामिस्तु भगिनी स्वसा ॥ २१७ ॥
६ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनीत्यपि ।
७पत्न्यास्तु भगिनी ज्येष्ठा ज्येष्ठश्वश्रूः कुली च सा ॥ २१८ ॥
८कनिष्ठा श्यालिका हाली यन्त्रणी केलिकुञ्चिका ।
९केलिर्द्रवः परीहासः क्रीडा लीला च नर्म च ॥ २१९ ॥
देवनं कूर्दनं खेला ललनं वर्करोऽपि च ।

---

१. 'बड़ा भाई'के ४ नाम हैं—ज्येष्ठः, पित्र्यः, पूर्वजः, अग्रजः ॥

२. 'छोटा भाई'के ७ नाम हैं—जघन्यजः, यविष्ठः, कनिष्ठः, अवरजः, अनुजः, यवीयान्, कनीयान् (२ – यस्) ॥

शेषश्चात्र—स्यात्कनिष्ठे तु कन्यसः ।

३. 'चाचा (काका, ताऊ), शाला और मामा'के क्रमशः १-१ नाम हैं—पितृव्यः, श्यालः, मातुलः ॥

४. 'देवर (पतिका छोटा भाई)'के ३ नाम हैं—देवा (– वृ), देवरः, देवा (– वन्) ॥

५. 'बहन'के ३ नाम हैं—जामिः, भगिनी, स्वसा (– सृ) ॥

शेषश्चात्र—ज्येष्ठभगिन्यां तु वीरभवन्ती ।

६—'ननद (पतिकी बहन)'के ३ नाम हैं—ननान्दा, ननन्दा (२—न्द), नन्दिनी ॥

७. 'बड़ी शाली (पत्नीकी बड़ी बहन)'के २ नाम हैं—ज्येष्ठश्वश्रूः, कुली ॥

८. 'छोटी शाली (पत्नीकी छोटी बहन)'के ४ नाम हैं—श्यालिका (+शालिका), हाली, यन्त्रणी, कलिकुञ्चिका ॥

९. 'क्रीडा, केलि, खेल, हँसी'के ११ नाम हैं—केलिः (पु स्त्री), द्रवः, परीहासः (+परिहासः), क्रीडा, लीला, नर्म (– र्मन् , न), देवनम्, कूर्दनम् , खेला, ललनम् , वर्करः ॥

विमर्श—क्रीडा, खेला, कूर्दनम्—ये शब्द खेलना, कूदना इन अर्थ विशेषोंमें रूढ रहनेपर भी विशेषके आश्रयकी अपेक्षा नहीं करनेसे यहाँ क्रीडा सामान्य अर्थमें कहे गये हैं ॥

शेषश्चात्र—स्यात् नर्मणि । सुखोत्सवं रागरसे विनोदोऽपि किलोऽपि च ।

१वप्ता तु जनकस्तातो बीजी जनयिता पिता ॥ २२० ॥
२पितामहस्तस्य पिता ३तत्पिता प्रपितामहः ।
४मातुर्मातामहाद्येवं ५माताऽम्बा जननी प्रसूः ॥ २२१ ॥
सवित्री जनयित्री च ६कृमिला तु बहुप्रसूः ।
७धात्री तु स्यादुपमाता ८वीरमाता तु वीरसूः ॥ २२२ ॥
९श्वश्रूर्माता पतिपत्न्योः १०श्वशुरस्तु तयोः पिता ।
११पितरस्तु पितुर्वंश्या १२मातुर्मातामहाः कुले ॥ २२३ ॥
१३पितरौ मातापितरौ मातरपितरौ पिता च माता च ।
१४श्वश्रूश्वशुरौ श्वशुरौ १५पुत्रौ पुत्रश्च दुहिता च ॥ २२४ ॥

---

१. 'पिता, बाप'के ६ नाम हैं—वप्ता (- प्तृ), जनकः, तातः, बीजी (- जिन्), जनयिता, पिता (२ तृ) ॥

शेषश्चात्र—वप्ता जनित्रो रेतोधास्ताते ।

२. 'दादा (पिताके पिता)'का १ नाम है—पितामहः ॥

३. 'परदादा (पितामहके पिता)'का १ नाम है—प्रपितामहः ॥

४. 'नाना'का १ नाम है—'मातामहः' और इसी प्रकार 'परनाना'का १ नाम है—प्रमातामहः' ॥

५. 'माता'के ६ नाम हैं—माता (- तृ), अम्बा, जननी, प्रसूः, सवित्री, जनयित्री ॥

शेषश्चात्र—जानी तु मातरि ।

६. 'बहुत सन्तान उत्पन्न करनेवाली माता'का १ नाम है—कृमिला (+ बहुप्रसूः) ॥

७. 'धाई, उपमाता'के २ नाम हैं—धात्री, उपमाता (- तृ) ॥

८. 'वीरमाता'का १ नाम है—(+ वीरमाता, - तृ), वीरसूः ॥

९. 'सास (पति या पत्नीकी माता)'का १ नाम है—श्वश्रूः ॥

१०. 'श्वशुर (पति या पत्नीका पिता)'का १ नाम है—श्वशुरः ॥

११. 'पितरों (पिताके वंशके पुरुखों)'का १ नाम है—पितरः (- तृ)।

१२. 'माताके वंशके पुरुखों'का १ नाम है—मातामहाः ॥

विमर्श—उक्त दोनों पदों ('पितरः, मातामहाः') में बहुवचनका प्रयोग पुरुखाओंके बहुत होनेकी अपेक्षासे किया गया है) ॥

१३. 'एक साथमें कहे गये माता-पिता'के ४ नाम हैं—पितरौ, मातापितरौ, मातरपितरौ (३ - तृ, नि० द्वि०) ॥

१४. 'एक साथमें कहे गये सास-श्वशुर'के २ नाम हैं—श्वश्रूश्वशुरौ, श्वशुरौ (२ नि० द्वि०) ॥

१५. 'एक साथ कहे गये पुत्र-पुत्री'का १ नाम है—पुत्रौ (नि. द्वि.) ॥

१भ्राता च भगिनी चापि भ्रातरावथ बान्धवः ।
२स्वो ज्ञातिः स्वजनो बन्धुः सगोत्रश्च ३निजः पुनः ॥ २२५ ॥
आत्मीयः स्वः स्वकीयश्च ४सपिण्डास्तु सनाभयः ।
५तृतीया प्रकृतिः षण्ढः षण्डः क्लीबो नपुंसकम् ॥ २२६ ॥
६इन्द्रियायतनमङ्गविग्रहौ क्षेत्रगात्रतनुभूघनास्तनूः ।
मूर्तिमत्करणकायमूर्तयो वेरसंहननदेहसञ्चराः ॥ २२७ ॥
घनो बन्धः पुरं पिण्डो वपुः पुद्गलवर्ष्मणी ।
कलेवरं शरीरो७ऽस्मिन्नजीवे कुणपं शवः ॥ २२८ ॥
मृतकं ८रुण्डकबन्धौ त्वपशीर्षे क्रियायुजि ।
९वयांसि तु दशाः प्रायाः १०सामुद्रं देहलक्षणम् ॥ २२९ ॥

---

१. 'एक साथ कहे गये भाई बहन'का १ नाम है—भ्रातरौ (-तृ, नि० द्वि०) ।

विमर्श—पूर्वोक्त 'पितरौ' आदि ६ पर्यायोंमें माता-पिता आदिके २-२ होनेके कारणसे द्विवचनका प्रयोग किया गया है ॥

२. अपनी जातिवालों'के ६ नाम हैं—बान्धवः, स्वः, ज्ञातिः (पु), स्वजनः, बन्धुः, सगोत्रः ॥

३. 'निजी, आत्मीय'के ४ नाम हैं—निजः, आत्मीयः, स्वः, स्वकीयः ॥

विमर्श—'उक्त दोनों (अपनी जातिवालों तथा आत्मीय') अर्थोंमें 'स्व' शब्द सर्वनामसंज्ञक होता है ॥

४. 'सपिण्ड' (सात पीढ़ियों तक पूर्वजों)'का १ नाम है—सपिण्डः ॥

५. 'नपुंसक'के ५ नाम हैं—तृतीयाप्रकृतिः, षण्ढः (+षण्डुः), षण्डः (+शण्ढः, शण्टः), क्लीबः, नपुंसकम् (२ पु न) ॥

६. 'शरीर'के २५ नाम हैं—इन्द्रियायतनम् , अङ्गम् , विग्रहः, क्षेत्रम् , गात्रम् , तनुः (स्त्री), भूघनः, तनूः (स्त्री), मूर्तिमत् , करणम् , कायः, मूर्तिः, वेरम् (पु न), संहननम् , देहः, (पु न), संचरः, घनः, बन्धः, पुरम् , पिण्डः (पु न), वपुः (-पुस् , न), पुद्गलः, वर्ष्म (—र्ष्मन् , न), कलेवरम् , शरीरः (पु न) ॥

७. 'शव,मुर्दा'के ३ नाम हैं—कुणपम् , शवः (२ पु न), मृतकम् ॥

८. 'शिरके कटनेपर नाचते हुए धड़ (मस्तकरहित शरीर)'के २ नाम हैं—रुण्डः, कबन्धः (पु न) ॥

९. 'वय, बाल्यादि अवस्थाओं'के ३ नाम हैं—वयांसि (-यस्), दशाः (स्त्री), प्रायाः (पु) ॥

१०. 'सामुद्रिक शास्त्र' (हाथ-पैर आदिमें शङ्ख-चक्रादि चिह्नोंका

१एकदेशे प्रतीकोऽङ्गावयवापघना अपि ।
२उत्तमाङ्गं शिरो मूर्धा मौलिर्मुण्डं कमस्तके ॥ २३० ॥
वराङ्गं करणत्राणं शीर्षं मस्तिकमित्यपि ।
३तज्जाः केशास्तीर्थवाकाश्चिकुराः कुन्तलाः कचाः ॥ २३१ ॥
वालाः स्युस्त४त्पराः पाशो रचना भार उच्चयः ।
हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः ॥ २३२ ॥
५अलकस्तु कर्करालः खङ्गरश्चूर्णकुन्तलः ।
६स तु भाले भ्रमरकः कुरुलो भ्रमरालकः ॥ २३३ ॥
७धम्मिल्लः संयताः केशाः ८केशवेषे कबर्यथ ।
वेणिः प्रवेणी—

शुभाशुभवर्णन करनेवाला शास्त्र-विशेष)'के २ नाम हैं—सामुद्रम् (+सामुद्रिकशास्त्राम), देहलक्षणम् ॥

१. 'अङ्ग'के ४ नाम हैं—प्रतीकः, अङ्गम् , अवयवः, अपघनः ॥

शेषश्चात्र—देहैकदेशे गात्रम् ।

२. 'मस्तक'के ११ नाम हैं—उत्तमाङ्गम् , शिरः (—रस् , न), मूर्धा (—र्धन् । पु), मौलिः (पु स्त्री), मुण्डम् (पु न), कम् , मस्तकम् (पु न), वराङ्गम् , करणत्राणम् , शीर्षम् , मस्तिकम् ॥

३. 'बाल, केश'के ६ नाम हैं—केशाः, तीर्थवाकाः, चिकुराः, (+चिहुराः), कुन्तलाः, कचाः, वालाः (पु न), बहुत्वकी अपेक्षासे यहाँ ब० व० प्रयुक्त हुआ है, अतः इन पर्यायोंका एकवचन भी होता है) ॥

४. उक्त 'केश'आदि शब्दके अन्तमें 'पाशः, रचना' आदि ७ शब्दोंके जोड़नेसे 'केश-समूह'के पर्यायवाचक शब्द बनते हैं, यथा—केशपाशः, केशरचना, केशभारः, केशोच्चयः, केशहस्तः केशपक्षः, केशकलापः ॥

५. 'घुमावदार टेढ़े बालों'के ४ नाम हैं—अलकः (पु न), कर्करालः, खङ्गरः, चूर्णकुन्तलः ॥

६. 'ललाटपर लटकते हुए बालों (काकुल, जुलजुली)'के ३ नाम हैं—भ्रमरकः (पु न), कुरुलः, भ्रमरालकः ॥

७. 'बंधे हुए बालों'का १ नाम है—धम्मिल्लः ॥

शेषश्चात्र—धम्मिल्ले मौलिजूटकौ ।

८. 'केशोंकी रचना'का १ नाम है— कबरी ॥

शेषश्चात्र—कबरी तु कबर्यां स्यात् ।

९. 'चोटी, गूथे हुए बाल'के २ नाम हैं—वेणिः (स्त्री), प्रवेणी (+प्रवेणिः) ॥

—१शीर्षण्यशिरस्यौ विशदे कचे ॥ २३४ ॥
२केशेषु वर्त्म सीमन्तः ३पलितं पाण्डुरः कचः ।
४चूडा केशी केशपाशी शिखा शिखण्डिकः समाः ॥ २३५ ॥
५सा बालानां काकपक्षः शिखण्डकशिखाण्डकौ ।
६तुण्डमास्यं मुखं वक्त्रं लपनं वदनानने ॥ २३६ ॥
७भाले गोध्यलिकालीकललाटानि ८श्रुतौ श्रवः ।
शब्दाधिष्ठानपैञ्जूषमहानादध्वनिग्रहाः ॥ २३७ ॥
कर्णः श्रोत्रं श्रवणञ्च ९वेष्टनं कर्णशष्कुली ।
१०पालिस्तु कर्णलतिका ११शङ्खो भालश्रवोऽन्तरे ॥ २३८ ॥

---

१. 'निर्मल (मैल आदिसे रहित) बाल'के २ नाम हैं—शीर्षण्यः, शिरस्यः ॥

शेषश्चात्र—प्रलोम्यो विशदे कचे ।

२. 'मांग'का १ नाम है—सीमन्तः ॥

३. 'पके हुए (श्वेत) बाल'का १ नाम है—पलितम् (पु न) ॥

४. 'शिखा', टीक, चुटिया'के ५ नाम हैं—चूडा, केशी, केशपाशी, शिखा, शिखण्डिकः ॥

५. 'काकपक्ष' (बच्चोंके कौवेके पंखके समान दोनों भागमें कटाये हुए बाल)के ३ नाम हैं—काकपक्षः, शिखण्डकः, शिखाण्डकः ॥

६. 'मुख'के ७ नाम हैं—तुण्डम्, आस्यम्, मुखम् (पु न), वक्त्रम्, लपनम्, वदनम्, आननम् ॥

शेषश्चात्र—मुखे दन्तानाभ्यन्तरं घनं चरं घनोत्तमम् ॥

७. 'ललाट'के ४ नाम हैं—भालम् (पु न), गोधिः (स्त्री), अलिकम्, अलीकम्, ललाटम् ॥

८. 'कान'के ९ नाम हैं—श्रुतिः, श्रवः (-वस् न), शब्दाधिष्ठानम्, पञ्जूषः (पु न), महानादः, ध्वनिग्रहः (+शब्दग्रहः), कर्णः, श्रोत्रम्, श्रवणम् (पु न) ॥

९. 'कर्णशष्कुली'के २ नाम हैं—वेष्टनम्, कर्णशष्कुली ॥

१०. 'कर्णमूल (कानके पासवाले भाग)'के २ नाम हैं—पालिः (स्त्री), कर्णलतिका ॥

शेषश्चात्र—कर्णप्रान्तस्तु धारा स्यात्कर्णमूलं तु शीलकम् ।

११. 'ललाट तथा कानके बीचवाले स्थान'का १ नाम है—शङ्खः (पु न) ॥

१चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम् ।
लोचनं दर्शनं दृक्च २तत्तारा तु कनीनिका ॥ २३९ ॥
३वामन्तु नयनं सौम्यं ४भानवीयन्तु दक्षिणम् ।
५असौम्येऽक्ष्ण्यनक्षि स्याद्६दीक्षणन्तु निशामनम् ॥ २४० ॥
निभालनं निशमनं निध्यानमवलोकनम् ।
दर्शनं द्योतनं निर्वर्णनञ्चा७थार्द्धवीक्षणम् ॥ २४१ ॥
अपाङ्गदर्शनं काक्षः कटाक्षोऽक्षिविकूणितम् ।
८स्यादुन्मीलनमुन्मेषो ९निमेषस्तु निमीलनम् ॥ २४२ ॥
१०अक्ष्णोर्बाह्यान्तावपाङ्गौ ११भ्रूरूर्ध्वे रोमपद्धतिः ।
१२सकोपभ्रूविकारे स्याद् भ्रुभ्रूभृकुटिः ॥ २४३ ॥

---

१. 'आँख'के १० नाम हैं—चक्षुः (-क्षुस्), अक्षि (२ न), ईक्षणम्, नेत्रम् (पु न), नयनम्, दृष्टिः, अम्बकम्, लोचनम् (+विलोचनम्), दर्शनम्, दृक् (-श्, स्त्री) ॥

शेषश्चात्र—अक्ष्णि रूपग्रहो देवदीपः ।

२. 'आँखकी पुतली'के २ नाम हैं—तारा (पु स्त्री । +तारका), कनीनिका ॥

३. 'बायीं आँख'का १ नाम है—सौम्यम् । (इसका चन्द्रमा देवता है) ॥

४. 'दहिनी आँख'का १ नाम है—भानवीयम् । (इसका सूर्य देवता है) ॥

५. 'सुन्दरताहीन आँख'का १ नाम है—अनक्षि ॥

६. 'देखने'के ९ नाम हैं—ईक्षणम्, निशामनम्, निभालनम्, निशमनम्, निध्यानम्, अवलोकनम्, दर्शनम्, द्योतनम्, निर्वर्णनम् ॥

७. 'कटाक्ष'के ५ नाम हैं—अर्धवीक्षणम्, अपाङ्गदर्शनम्, काक्षः, कटाक्षः, अक्षिविकूणितम् ॥

८. 'आँख खोलने'के २ नाम हैं—उन्मीलनम्, उन्मेषः ॥

९. 'आँख (की पलक) बन्द करने'के २ नाम हैं—निमेषः, निमीलनम् ॥

१०. 'आँखके आस-पासके दोनों भागों'का १ नाम है—अपाङ्गौ । (एकत्वका विवक्षामें ए० व० भी प्रयुक्त होता है) ॥

११. 'भौंहका १ नाम है—भ्रूः (स्त्री) ॥

१२. क्रोधसे भौंहके टेढ़े होने'के ४ नाम हैं—भ्रुकुटिः, भ्रुकुटिः, भ्रूकुटिः, भृकुटिः (सब स्त्री) ॥

१कूर्चं कूर्पं भ्रुवोर्मध्ये २पक्ष्म स्यान्नेत्ररोमणि ।
३गन्धज्ञा नासिका नासा घ्राणं घोणा विकूणिका ॥ २४४ ॥
नक्रं नर्कुटकं शिङ्घिनी४न्योष्ठोऽधरो रदच्छदः ।
दन्तवस्त्रञ्च ५तत्प्रान्तौ सृक्कणी ६अ्रसिकन्त्वधः ॥ २४५ ॥
७असिकाधस्तु चिबुकं स्याद्८गल्लः सृक्कणः परः ।
९गल्लात्परः कपोलश्च १०परो गण्डः कपोलतः ॥ २४६ ॥
११ततो हनुः १२श्मश्रु कूर्चमास्यलोम च मासुरी ।
१३दाढिका दंष्ट्रिका—

---

१. 'भौहोंके मध्यभाग'के २ नाम हैं—कूर्चम् (पु न), कूर्पम् ॥

२. 'पपनी (नेत्रके बालों)'का १ नाम है—पक्ष्म (-क्ष्मन् पु न) ॥

३. 'नाक'के ६ नाम हैं—गन्धज्ञा, नासिका, नासा, घ्राणम्, घोणा, विकूणिका, नक्रम् (न । + पु), नर्कुटकम् (+ नर्कुटम्), शिङ्घिनी ॥

शेषश्चात्र—नासा तु गन्धहृत् । नसा गन्धवहा नस्या नासिक्यं गन्धनालिका ।

४. 'ओष्ठ'के ४ नाम हैं—ओष्ठः, अधरः, रदच्छदः, दन्तवस्त्रम् (पु न । किसीके मतसे 'अधर' शब्द नीचेवाले ओष्ठका पर्याय है) ॥

शेषश्चात्र—ओष्टे तु दशनोच्छिष्टो रसालेपी च वाग्दलम् ।

५. 'ओष्ठप्रान्तों (ओष्ठके दोनों भागों—गलजबड़ों)'का १ नाम है—सृक्कणी (क्कि । + सृक्कणी,-क्कि, सृक्किणी,—क्किन् । द्वित्वापेक्षासे द्विवचनका प्रयोग किया गया है) ॥

६. 'ओष्ठके नीचेवाले भाग'का १ नाम है—असिकम् ॥

७. 'उक्त असिकके नीचेवाले भाग, ठुड्डी'का १ नाम है—चिबुकम् ॥

८. 'गलजबड़ोंके बादवाले भाग'का १ नाम है—गल्लः ॥

९. 'कपोल, गाल (गल्लके बादवाले भाग)'का १ नाम है—कपोलः ॥

१०. 'कपोलके बादवाले भाग'का १ नाम है—गण्डः ॥

विमर्श—विशेष भेद नहीं होनेसे 'गल्लः, कपोलः, गण्डः'—ये तीनों शब्द एकार्थक ('गाल'के वाचक) ही हैं, ऐसा भी किसी का मत है ॥

११. 'ठुड्डी दाढ़ी' या—ऊपरवाले जबड़े'का १ नाम है—हनुः (पु स्त्री) ॥

१२. 'दाढ़ीके बाल'के ४ नाम हैं—श्मश्रु (न), कूर्चम् (पु न), आस्यलोम (-मन्), मासुरी ॥

शेषश्चात्र—श्मश्रुणि व्यञ्जनं कोटः ।

१३. 'दाढ़ी'के २ नाम हैं—दाढिका, दंष्ट्रिका (+ द्राढिका) ॥

—१दाढा दंष्ट्रा जम्भो २द्विजा रदाः ॥ २४७ ॥
रदना दशना दन्ता दंशखादनमल्लकाः ।
३राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित् ॥ २४८ ॥
४रसज्ञा रसना जिह्वा लोला ५तालु तु काकुदम् ।
६सुधास्रवा घण्टिका च लम्बिका गलशुण्डिका ॥ २४९ ॥
७कन्धरा धमनिर्ग्रीवा शिरोधिश्च शिरोधरा ।
८सा त्रिरेखा कम्बुग्रीवा९ऽवटुर्घाटा कृकाटिका ॥ २५० ॥
१०कृकस्तु कन्धरामध्यं ११कृकपार्श्वौ तु वीतनौ ।
१२ग्रीवाधमन्यौ प्राग् नीले १३पश्चान्मन्ये कलम्बिके ॥ २५१ ॥

---

१. 'दाढ़'के ३ नाम हैं—दाढा, दंष्ट्रा, जम्भः ॥

२. 'दाँत'के ८ नाम हैं—द्विजाः, रदाः, रदनाः, दशनाः, दन्ताः, दंशाः, खादनाः, मल्लकाः । (यहाँ बहुत्यापेक्षा से बहुवचन कहा गया है) ॥

शेषश्चात्र—दन्ते मुखखुरः खरः । दालुः ।

३. 'ऊपरमें स्थित बीचवाले दो दाँतों'का १ नाम है—राजदन्तौ ॥

विमर्श—किसी-किसीके मतसे ऊपर-नीचे (दोनों भागोंमें) स्थित दो-दो दाँतोंका १ नाम है—राजदन्ताः । दोनोंमें-से प्रथम मतमें दो दाँत होनेसे द्विवचन तथा दूसरे मतमें चार दाँत होनेसे बहुवचन प्रयुक्त हुआ है ॥

४. 'जीभ'के ४ नाम हैं—रसज्ञा, रसना (स्त्री न), जिह्वा, लोला ।

शेषश्चात्र—जिह्वा तु रसिका, रस्ना च रसमातृका । रसा काकुर्ललना च ।

५. 'तालु'के २ नाम हैं—तालु (न), काकुदम् ॥

शेषश्चात्र—वक्त्रदलं तु तालुनि ।

६. 'घाँटी'के ४ नाम हैं—सुधास्रवा, घण्टिका, लम्बिका, गलशुण्डिका ॥

७. 'गर्दन'के ५ नाम हैं—कन्धरा, धमनिः (स्त्री), ग्रीवा, शिरोधिः (स्त्री), शिरोधरा ॥

८. 'तीन रेखायुक्त गर्दन'का १ नाम है—कम्बुग्रीवा ॥

९. 'गर्दनके पीछेवाले भाग'के ३ नाम हैं—अवटुः, (पु स्त्री), घाटा, कृकाटिका ॥

शेषश्चात्र—अवटौ तु शिरःपीठम् ॥

१०. 'गर्दनके बीच'का १ नाम है—कृकः ॥

११. 'उक्त कृकके अगल-बगलवाले भागों'का १ नाम है—वीतनौ ॥

१२. 'गर्दनके आगेवाली दोनों नाड़ियों'का १ नाम है—नीले (-ला, स्त्री) ॥

१३. 'गर्दनके पीछेवाली दोनों नाड़ियों'का १ नाम है—कलम्बिके (-का,

१गलो निगरणः कण्ठः २काकलकस्तु तन्मणिः ।
३अंसो भुजशिरः स्कन्धो ४जत्रु सन्धिरुरोंऽसगः ॥ २५२ ॥
५भुजो बाहुः प्रवेष्टो दोर्वाहा६ऽथ भुजकोटरः ।
दोर्मूलं खण्डिकः कक्षा ७पार्श्वं स्यादेतयोरधः ॥ २५३ ॥
८कफोणिस्तु भुजामध्यं कफणिः कूर्परश्च सः ।
९अधस्तस्याऽऽमणिबन्धात् स्यात्प्रकोष्ठः कलाचिका ॥ २५४ ॥
१०प्रगण्डः कूर्परांसान्तः ११पञ्चशाखः शयः शमः ।
हस्तः पाणिः करो१२ऽस्यादौ मणिबन्धो मणिश्च सः ॥ २५५ ॥
१३करभोऽस्मादाकनिष्ठ—

स्त्री । 'वीतनौ, नीले, कलम्बिके'—इन तीनोंमें द्वित्वकी अपेक्षासे द्विवचनका प्रयोग किया गया है) ॥

१. 'कण्ठ'के ३ नाम हैं—गलः, निगरणः, कण्ठः (पु ।+पु न) ॥

२. 'कण्ठमणि'का १ नाम है—काकलकः (+काकलः) ॥

३. 'कन्धे'के ३ नाम हैं—अंसः (पु न), भुजशिरः -रस् । + भुजशिखरम्), स्कन्धः ॥

४. 'हँसुली' (कन्धेसे छातीको जोड़नेवाली हड्डी) का १ नाम है—जत्रु (न). ॥

५. 'बाँह, भुजा'के ५ नाम हैं—भुजः, बाहुः, (२ पु स्त्री), प्रवेष्टः, दोः (—स् , पु न), बाहा ॥

६. 'काँख'के ४ नाम हैं—भुजकोटरः (पु न), दोर्मूलम् , खण्डिकः, कक्षा (पु स्त्री) ॥

७. 'पँजड़ी (काँखके नीचेवाले भाग) का १ नाम है—पार्श्वम् (पु न) ॥

८. 'कोहुनी (बाँहके बीचवाले भाग)'के ४ नाम हैं—कफोणिः (स्त्री । +कफाणिः), भुजामध्यम् , कफणिः (स्त्री ।+पु), कूर्परः (+कुर्परः) ॥

शेषश्चात्र—कफोणौ रत्नपृष्ठकम् ।
बाहूपबाहुसन्धिश्च ।

९. 'कोनीके नीचे कलाई तकके भाग'के २ नाम हैं-प्रकोष्ठः, कलाचिका ॥

१०. 'कोहुनीसे कन्धेतकके भाग'का ४ नाम हैं—प्रगण्डः ॥

११. 'हाथ'के ६ नाम हैं—पञ्चशाखः, शयः, शमः, हस्तः (पु न), पाणिः (पु), करः ॥

शेषश्चात्र—हस्ते भुजदलः सलः ॥

१२. 'मणिबन्ध (कलाई)'के २ नाम हैं—मणिबन्धः, मणिः (पु स्त्री) ॥

१३. 'कलाईसे कनिष्ठा अङ्गुलिके मूलतक बाहरी भाग'का १ नाम है—करभः ॥

—१करशाखाङ्गुली समे।
अंगुरी २चांगुलोऽङ्गुष्ठ३स्तर्जनी तु प्रदेशिनी ॥ २५६ ॥
४ज्येष्ठा तु मध्यमा मध्या ५सावित्री स्यादनामिका।
६कनीनिका तु कनिष्ठा७ऽवहस्तो हस्तपृष्ठतः ॥ २५७ ॥
८कामाङ्कुशो महाराजः करजो नखरो नखः।
करशूको भुजाकण्टः पुनर्भवपुनर्नवौ ॥ २५८ ॥
९प्रदेशिन्यादिभिः सार्धमङ्गुष्ठे वितते सति।
प्रादेशतालगोकर्णवितस्तयो यथाक्रमम् ॥ २५९ ॥
१०प्रसारितांगुलौ पाणौ चपेटः प्रतलस्तलः।
प्रहस्तस्तालिका तालः ११सिंहतलस्तु तौ युतौ ॥ २६० ॥

---

१. 'अंगुलि'के ३ नाम हैं—करशाखा, अङ्गुली (+अङ्गुलिः), अङ्गुरी ॥

२. 'अंगूठे'के २ नाम हैं—अङ्गुलः, अङ्गुष्ठः ॥

३. 'तर्जनी (अँगूठेके बादवाली अङ्गुलि)'के २ नाम हैं—तर्जनी, प्रदेशिनी ॥

४. 'बीचवाली (तर्जनीके बादवाली) अङ्गुलि'के ३ नाम हैं—ज्येष्ठा, मध्यमा, मध्या ॥

५. अनामिका (मध्यमा तथा कनिष्ठाके बीचवाली अंगुलि)'के २ नाम हैं—सावित्री, अनामिका ॥

६. 'कनिष्ठा' (सबसे छोटी अंगुलि)'के २ नाम हैं—कनीनिका, कनिष्ठा ॥

७. 'हथेलीके पीछेवाले भाग'का १ नाम है—अवहस्तः ॥

८. 'नख, नाखून'के ६ नाम हैं—कामाङ्कुशः, महाराजः, करजः (यौ०—पाणिजः, कररुहः,.........), नखरः (त्रि), नखः (पु न), करशूकः, भुजाकण्टः, पुनर्भवः, पुनर्नवः ॥

९. 'तर्जनी आदि (तर्जनी, मध्यमा, अनामिका और कनिष्ठा अंगुलियोंके साथ अंगुष्ठ अङ्गुलिको फैलानेपर होनेवाले नाप (लम्बाई)'का क्रमशः १-१ नाम होता है—प्रादेशः, तालः, गोकर्णः, वितस्तिः (पु स्त्री) अर्थात् 'बित्ता' ॥

१०. 'थप्पड़, चटकन'के ६ नाम हैं—चपेटः (पु स्त्री), प्रतलः, तलः, प्रहस्तः, तालिका, तालः ॥

११. 'फैलाये हुए दोनों हाथोंके सटाने (दोहथा)'का १ नाम है—सिंहतलः (+संहतलः) ॥

१संपीडितांगुलिः पाणिर्मुष्टिर्मुस्तुर्मुचुट्यपि ।
संग्राहश्चा२र्धमुष्टिस्तु खटकः ३कुञ्चितः पुनः ॥ २६१ ॥
पाणिः प्रसृतः प्रसृति४स्तौ युतौ पुनरञ्जलिः ।
५प्रसृते तु द्रवाधारे गण्डूषश्चुलुकश्चलुः ॥ २६२ ॥
६हस्तः प्रामाणिको मध्ये मध्यमाङ्गुलिकूर्परम् ।
७बद्धमुष्टिरसौ रत्नि८ररत्निर्निष्कनिष्ठिकः ॥ २६३ ॥
९व्यामव्यायामन्यग्रोधास्तिर्यग्बाहू प्रसारितौ ।
१०ऊर्ध्वीकृतभुजापाणि नरमानं तु पौरुषम् ॥ २६४ ॥
११दघ्नद्वयसमात्रास्तु जान्वादेस्तत्तदुन्मिते ।

---

१. 'मुट्ठी, मुक्का'के ४ नाम हैं—मुष्टिः, मुस्तुः, (२ पु स्त्री), मुचुटी (स्त्री), संग्राहः ॥

२. 'खुली हुई (आधी बंद) मुट्ठी'का १ नाम है—खटकः ॥

३. 'पसर'के २ नाम हैं—प्रसृतः, प्रसृतिः (स्त्री) ॥

४. 'अञ्जलि'का १ नाम है—अञ्जलिः (पु) ॥

५. 'चुल्लू'के ३ नाम हैं—गण्डूषः, चुलुकः (२ पु स्त्री), चलुः (पु । +चलुकः) ॥

६. 'हाथभर (केहुनीसे मध्यमा अङ्गुलितक फैलानेसे होनेवाले २४ अंगुल या २ वित्तेकी लम्बाईवाले प्रमाणविशेष)'का १ नाम है—हस्तः ॥

७. 'निमुट हाथभर (केहुनीसे मुट्ठी बाँधकर फैलानेसे होनेवाले नाप)'का १ नाम है—रत्निः (पु स्त्री) ॥

८. 'केहुनीसे कनिष्ठा अंगुलिके फैलानेसे होनेवाले नाप'का १ नाम है—अरत्निः (पु स्त्री) ॥

९. 'दोनों हाथ फैलानेपर होनेवाले नाप'के ३ नाम हैं— व्यामः, व्यायामः, न्यग्रोधः ॥

शेषश्चात्र—अथ व्यामे वियामः स्याद्बाहुचापस्तनूतलः ।

१०. 'पोरसा' (खड़ा होकर हाथ उठानेसे होनेवाले (साढ़े चार हाथका)नाप'का १ नाम है—पौरुषम् ॥

११. 'जानु'आदि शब्दोंके बादमें 'दघ्नम् , द्वयसम् , मात्रम् (३ त्रि) प्रत्यय लगानेसे बने हुए 'जानुदघ्नम् , जानुद्वयसम् , जानुमात्रम्' शब्द 'जानु (घुटने, ठेहुने) तक पानी आदिके नाम हो जाते हैं। यथा—जानुदघ्नं जलम् , जानुद्वयसं जलम् , जानुमात्रं जलम्'का अर्थ 'घुटनाभर पानी' होता है । (इसीप्रकार 'ऊरु' आदि शब्दोंके बाद 'दघ्न' आदि जोड़नेपर 'ऊरुदघ्नम्' आदि शब्द बनते हैं) ॥

१रीढकः पृष्ठवंशः स्यात् २पृष्ठं तु चरमं तनोः ॥ २६५ ॥
३पूर्वभाग उपस्थोऽङ्कः क्रोड उत्सङ्ग इत्यपि ।
४क्रोडोरो हृदयस्थानं वक्षो वत्सो भुजान्तरम् ॥ २६६ ॥
५स्तनान्तरं हृद् हृदयं ६स्तनौ कुचौ पयोधरौ ।
उरोजौ च ७चूचुकं तु स्तनाद् वृन्तशिखामुखाः ॥ २६७ ॥
८तुन्दं तुन्दिर्गर्भकुक्षी पिचण्डो जठरोदरे ।
९कालखण्डं कालखञ्जं कालेयं कालकं यकृत् ॥ २६८ ॥
१०दक्षिणे तिलकं क्लोम—

---

१. 'पीठकी रीढ'के २ नाम हैं—रीढकः, पृष्ठवंशः ॥

२. 'पीठ'का १ नाम है—पृष्ठम् । (आरोपसे 'पृष्ठ' शब्द पीछेका भी वाचक है) ॥

३. 'गोद, क्रोड'के ४ नाम हैं—उपस्थः, अङ्कः, क्रोडः, उत्सङ्गः ॥

४. 'अँकवार (दोनों भुजाओंका मध्यभाग)'के ६ नाम हैं—क्रोडा (स्त्री न), उरः (-रस्, न), हृदयस्थानम्, वक्षः (—स्, न), वत्सः (पु न), भुजान्तरम् ॥

५. 'हृदय'के ३ नाम हैं—स्तनान्तरम्, हृत् (—द् न), हृदयम् ॥

शेषश्चात्र—हृद्यसहं मर्मचरं गुणाधिष्ठानकं श्रमम् ।

६. 'स्तन'के ४ नाम हैं—स्तनौ, कुचौ, पयोधरौ, उरोजौ (यौ०—उरसिजौ, वक्षोजौ,······। द्वित्वकी अपेक्षासे इनका प्रयोग द्विवचनमें हुआ है) ॥

शेषश्चात्र—गुणौ तु धरणौ ।

७. 'स्तनके अग्रभाग (जिसे बच्चे मुखमें लेकर दुग्धपान करते हैं, उस)'के ४ नाम हैं—चूचुकम् (पु न), स्तनवृन्तम्, स्तनशिखा, स्तनमुखम् ॥

शेषश्चात्र—अग्रे तयोः पिप्पलमेचकौ ।

८. 'पेट, तोंद'के ७ नाम हैं—तुन्दम्, तुन्दिः (स्त्री), गर्भः, कुक्षिः (पु ।+ पु स्त्री), पिचण्डः, जठरम् (पु न), उदरम् (न । + पु स्त्री) (वाचस्पतिके मतसे 'पेट'के आधारका नाम 'कुक्षि' है) ॥

९. यकृत्, कलेजा (हृदयके भागमें स्थित कृष्ण वर्णवाले मांस-विशेष)'के ५ नाम हैं—कालखण्डम्, कालखञ्जम्, कालेयम्, कालकम्, यकृत् (न) ॥

१०. 'फेफड़ा (हृदयके दहने भागमें स्थित पेटके जलाधार-विशेष)'के २ नाम हैं—तिलकम्, क्लोम (-मन्, न) ॥

—१वामे तु रक्तफेनजः ।
पुप्फसः स्या२दथ प्लीहा गुल्मो ऽ३न्त्रं तु पुरीतति ॥ २६६ ॥
४रोमावली रोमलता ५नाभिः स्यात्तुन्दकूपिका ।
६नाभेरधो मूत्रपुटं वस्तिर्मूत्राशयोऽपि च ॥ २७० ॥
७मध्योऽवलग्नं विलग्नं मध्यमो८ऽथ कटः कटिः ।
श्रोणिः कलत्रं कटीरं काञ्चीपदं ककुद्मती ॥ २७१ ॥
९नितम्बारोहौ स्त्रीकट्याः पश्चा१०ज्जघनमग्रतः ।
११त्रिकं वंशाध१२स्तत्पार्श्वकूपकौ तु कुकुन्दरे ॥ २७२ ॥
१३युतौ स्फिचौ कटिप्रोथौ—

शेषश्चात्र—जठरे मलुको रोमलताधारः ।

१. 'फुप्फुस' (हृदयके बाँये भागमें रक्तफेनसे उत्पन्न)'के २ नाम हैं—रक्तफेनजः, पुप्फसः ॥

२. 'प्लीहा, गुल्मनामक रोग'के २ नाम हैं—प्लीहा, गुल्मः (पु न)

३. 'आँत'के २ नाम हैं—अन्त्रम्, पुरीतत् (न ।+पु) ॥

४. 'नाभिके नीचेवाली रोमपंक्ति'के २ नाम हैं—रोमावली, रोमलता ॥

५. 'नाभि'के २ नाम हैं—नाभिः (पु स्त्री), तुन्दकूपिका ॥

शेषश्चात्र—अथ क्लोमनि । स्यात्ताल्वं क्लपुषं क्लोमम् ।

६. 'मूत्राशय'के ३ नाम हैं—मूत्रपुटम्, वस्तिः (पु स्त्री), मूत्राशयः ॥

७. 'शरीरके मध्यभाग'के ४ नाम हैं—मध्यः, अवलग्नम्, मध्यमः (सब पु न) ॥

८. 'कटि, कमर'के ७ नाम हैं—कटः (पु न), कटिः (स्त्री), श्रोणिः (पु स्त्री), कलत्रम्, कटीरम् काञ्चीपदम्, ककुद्मती ॥

९. 'नितम्ब (स्त्रीके चूतड़)'के २ नाम हैं—नितम्बः, आरोहः ॥

१०. 'जघन'का १ नाम है—जघनम् ॥

११. 'पीठकी रीढ़के नीचे तथा दोनों ऊरुके जोड़वाले भाग'का १ नाम है—त्रिकम् ॥

१२. 'उक्त, त्रिक'के पासवाले दोनों भागमें स्थित गर्तविशेष'का १ नाम है—कुकुन्दरे (न, द्वित्वापेक्षासे द्विवचन कहा गया है अतः एकवचन भी होता है ।+५+कुकुन्दुरः) ॥

शेषश्चात्र—कटीकूपा तुच्चिलिङ्गौ रतावुके ।

१३. 'दोनों चूतड़ों'के २ नाम हैं—स्फिचौ (च्, स्त्री), कटिप्रोथौ । (द्वित्वकी अपेक्षासे द्विवचन कहा गया है, अतः एकवचन भी होता है) ॥

—१वराङ्गं तु च्युतिर्बुलिः ।
भगोऽपत्यपथो योनिः स्मरान्मन्दिरकूपिके ॥ २७३ ॥
स्त्रीचिह्नं२मथ पुंश्चिह्नं मेहनं शेपशेपसी ।
शिश्नं मेढ्रः कामलता लिङ्गं च ३द्वयमप्यदः ॥ २७४ ॥
गुह्यप्रजननोपस्था ४गुह्यमध्यं गुलो मणिः ।
५सीवनी तदधःसूत्रं ६स्यादण्डं पेलमण्डकः ॥ २७५ ॥
मुष्कोऽण्डकोशो वृषणो७ऽपानं पायुर्गुदं च्युतिः ।
अधोमर्म शकृद्द्वारं त्रिवलीक-बुली अपि ॥ २७६ ॥
८विटपं तु महाबीज्यमन्तरा मुष्कवङ्क्षणम् ।
९ऊरुसन्धिर्वङ्क्षणः स्यात् १०सक्थ्यूरुस्तस्य पर्व तु ॥ २७७ ॥

---

१. 'योनि'के ६ नाम हैं—वराङ्गम् , च्युतिः, बुलिः (२ स्त्री), भगः (पु न), अपत्यपथः, योनिः (पु स्त्री), स्मरमन्दिरम् , स्मरकूपिका, स्त्रीचिह्नम् ॥

२. 'लिङ्ग (पुरुषोंके पेशाब करनेवाला इन्द्रिय')के ८ नाम हैं—पुंश्चिह्नम् , मेहनम् , शेपः, शेपः (-पस् , न), शिश्नम् , मेढ्रः (२ पु न), कामलता, लिङ्गम् ॥

शेषश्चात्र—शिश्ने तु लंगुलं शंकु लाङ्गूलं शेफशेफसी ।

३. 'योनि तथा लिङ्ग' दोनोंके ३ नाम और भी हैं—गुह्यम् , प्रजननम्, उपस्थः (पु । + पु न) ॥

४. 'गुह्य (लिङ्ग)के मध्यभागस्थ मणि'के २ नाम हैं—गुलः, मणिः (पु स्त्री) ॥

५. 'गुह्य (लिङ्ग तथा योनि)'के नीचे 'स्थित सीवन'का १ नाम है—सीवनी ॥

६. 'अण्डकोष (फोता)'के ६ नाम हैं—अण्डम् (न । + न पु । + आण्डः), पेलम् (+ पेलकः), अण्डकः, मुष्कः (पु न), अण्डकोशः, वृषणः (पु न) ॥

७. 'गुदा (पाखाने का मार्ग)'के ८ नाम हैं—अपानम् , पायुः (पु), गुदम् (पु न), च्युतिः, अधोमर्म (-र्मन्), शकृद्द्वारम्, त्रिवलीकम् , बुलिः (स्त्री) ॥

८. 'अण्डकोष तथा ऊरुसन्धिके मध्यवाली रेखा'के २ नाम हैं—विटपम् , महाबीज्यम् ॥

९. 'ऊरुसन्धि'का १ नाम है (+ ऊरुसन्धिः), वङ्क्षणः ॥

१०. 'जङ्घा'के २ नाम हैं—सक्थि (न), ऊरुः (पु स्त्री) ॥

१जानुर्नलकीलोऽष्ठीवान् २पश्चाद्भागोऽस्य मन्दिरः।
३कपोली त्वग्रिमो ४जङ्घा प्रसृता नलकीन्यपि ॥ २७८ ॥
५प्रतिजङ्घा त्वग्रजङ्घा ६पिण्डिका तु पिचण्डिका।
७गुल्फस्तु चरणग्रन्थिर्घुटिको घुण्टको घुटः ॥ २७९ ॥
८चरणः क्रमणः पादः पदोऽङ्घ्रिश्चलनः क्रमः।
९पादमूलं गोहिरं स्यात् १०पार्ष्णिस्तु घुटयोरधः ॥ २८० ॥
११पादाग्रं प्रपदं १२क्षिप्रं त्वङ्गुष्ठाङ्गुलिमध्यतः।
१३कूर्चं क्षिप्रस्योप१४र्यङ्घ्रिस्कन्धः कूर्चशिरः समे ॥ २८१ ॥
१५तलहृदयं तु तलं मध्ये पादतलस्य तत्।
१६तिलकः कालकः पिप्लुर्जडुलस्तिलकालकः ॥ २८२ ॥

---

१. 'घुटना, ठेहुना' ३ नाम हैं—जानुः (पु न), नलकीलः, अष्ठीवान् (—वत्, पु न) ॥

२. 'घुटनेके पीछेवाले भाग'का १ नाम है—मन्दिरः ॥

३. 'घुटनेके आगेवाले भाग'का १ नाम है—कपोली ॥

४. 'जङ्घा' (पिंडली, घुटनेके नीचेवाले भाग)के ३ नाम हैं—जङ्घा, प्रसृता, नलकीनी ॥

५. 'जङ्घाके आगेवाले भाग'के २ नाम हैं—प्रतिजङ्घा, अग्रजङ्घा ॥

६. 'पिंडलीके पीछेवाले मांसल भाग'के २ नाम हैं—पिण्डिका, पिचण्डिका ॥

७. 'पैरकी फिल्ली (घुट्टी, एड़ीके ऊपरवाली गांठ)'के ४ नाम हैं—गुल्फः (+चरणग्रन्थिः), घुटिकः, घुण्टकः, घुटः (सब पु स्त्री) ॥

८. 'पैर'के ७ नाम हैं—चरणः, (पु न), क्रमणः, पादः (+पात्—द्), पदः (पु न। +पत्—द्), अङ्घ्रिः (पु। अङ्घ्रिः), चलनः, क्रमः ॥

९. 'एड़ी'का १ नाम है—(+पादमूलम्) गोहिरम् ॥

१०. 'घुट्टियोंके नीचेवाले भाग'का १ नाम है—पार्ष्णिः (स्त्री) ॥

११. 'पैरके आगेवाले भाग (पैरका पंजा)'का १ नाम है—प्रपदम् ॥

१२. 'पैरके अङ्गूठे तथा अंगुलियोंके बीचवाले भाग'का १ नाम है—क्षिप्रम् ॥

१३. 'उक्त 'क्षिप्र'के ऊपरवाले भाग'का १ नाम है—कूर्चम् ॥

१४. 'उक्त 'कूर्च'के ऊपरवाले भाग'के २ नाम हैं—अङ्घ्रिस्कन्धः, कूर्चशिरः (—रस्) ॥

१५. 'पैरके तलवे (सुपली)'के २ नाम हैं—तलहृदयम्, तलम् ॥

१६. 'अङ्गमें तिलके समान काले चिह्न'के ५ नाम हैं—तिलकः, कालकः, पिप्लुः, (पु), जडुलः, तिलकालकः ॥

१रसासृग्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ।
सप्तैव दश वैकेषां रोमत्वक्स्नायुभिः सह ॥ २८३ ॥
२रस आहारतेजोऽग्निसंभवः षड्रसासवः ।
आत्रेयोऽसृक्करो धातुर्घनमूलमहापरः ॥ २८४ ॥
३रक्तं रुधिरमाग्नेयं विस्रं तेजोभवं रसात् ।
शोणितं लोहितमसृग् वाशिष्टं प्राणदाऽऽसुरे ॥ २८५ ॥
क्षतजं मांसकार्यस्रं ४मांसं पललजङ्गले ।
रक्तात्तेजोभवे क्रव्यं काश्यपं तर ामिषे ॥ २८६ ॥
मेदस्कृत पिशितं कीनं पलं ५पेश्यस्तु तल्लताः ।
६बुक्का हृद् हृदयं वृक्का सुरसं च तदग्रिमम् ॥ २८७ ॥
७शुष्कं वल्लूरमुत्तप्तं—

---

१. 'रसः (खाए हुए अन्नादिसे बना हुआ सार भाग), असृक् (-ज्, रक्त), मांसः (मांस), मेदः (-दस्, मेदा), अस्थि (हड्डी), मज्जा (शरीरकी हड्डियोंकी नालियोंमें होनेवाला स्निग्ध पदार्थ), शुक्रम् (वीर्य)—ये ७ 'धातवः' अर्थात् 'धातु' कहलाते हैं। किसी-किसीके मतसे उक्त ७ तथा 'रोम (-मन्, न। रोएँ,बाल), त्वक् (-च्, स्त्री। चमड़ा), स्नायुः (नाड़ी, नस)—ये ३ कुल १० 'धातवः' अर्थात् 'धातु' कहलाते हैं ॥

२. (अब क्रमसे उक्त रसादि १० के पर्यायोंको कहते हैं—) 'भोजन किये हुए पदार्थके सार भाग'के ६ नाम हैं—रसः, आहारतेजः (-जस्), अग्निसंभवः, षड्रसासवः, आत्रेयः, असृक्करः, घनधातुः, महाधातुः, मूलधातुः ॥

३. 'रक्त, खून'के १५ नाम हैं—रक्तम्, रुधिरम्, आग्नेयम्, विस्रम्, रसतेजः (-जस्), रसभवम्, शोणितम्, लोहितम्, असृक् (-ज्, न), वाशिष्ठम्, प्राणदम्, आसुरम्, क्षतजम्, मांसकारि (-रिन्), अस्रम् ॥

शेषश्चात्र—रक्ते तु शोध्यकीलाले।

४. 'मांस'के १३ नाम हैं—मांसम् (पु न), पललम्, जङ्गलम्, (पु न), रक्ततेजः (-जस्), रक्तभवम्, क्रव्यम, काश्यपम, तरसम्, आमिषम् (पु न), मेदस्कृत्, पिशितम, कीनम, पलम् (पु न) ॥

शेषश्चात्र—मांसे तूद्धः समारटम्। लेपनञ्च।

५. 'मांसपेशियों'का १ नाम है—पेश्यः (बहुत्वकी अपेक्षा से बहुवचनका प्रयोग होनेसे 'पेशी' ए० व० भी होता है) ॥

६. 'हृदय'के ५ नाम हैं—बुक्का (-क्कन्, पु। + -क्का, स्त्री। + बुक्कम्, न पु,) हृद्, हृदयम्, वृक्का (स्त्री। + पु), सुरसम् ॥

७. 'सूखे मांस'के २ नाम हैं—वल्लूरम् (त्रि), उत्तप्तम् ॥

—१पूयदूष्ये पुनः समे ।
२मेदोऽस्थिकृद्वपा मांसात्तेजो-जे गौतमं वसा॥ २८८ ॥
३गोदं तु मस्तकस्नेहो मस्तिष्को मस्तुलुङ्गकः ।
४अस्थि कुल्यं भारद्वाजं मेदस्तेजश्च मज्जकृत्॥ २८९ ॥
मांसपित्तं श्वदयितं कर्करो देहधारकम् ।
मेदोजं कीकसं सारः ५करोटिः शिरसोऽस्थनि॥ २९० ॥
६कपालकर्परौ तुल्यौ ७पृष्ठस्यास्थ्नि कशेरुका ।
८शाखास्थनि स्यान्नलकं ९पार्श्वास्थ्नि वङ्क्रिपर्शुके ॥ २९१ ॥
१०शरीरास्थि करङ्कः स्यात् कङ्कालमस्थिपञ्जरः ।
११मज्जा तु कौशिकः शुक्रकरोऽस्थ्नः स्नेहसंभवौ ॥ २९२ ॥

---

१. 'पीब'के २ नाम हैं—पूयम् (पु न), दूष्यम् ॥

२. 'चर्बी'के ७ नाम हैं—मेदः (-दस्, न), अस्थिकृत्, वपा, मांस-तेजः (-जस्), मांसजम्, गौतमम् वसा ॥

३. 'मस्तिष्क, दिमाग'के ४ नाम हैं—गोदम् (न । +पु), मस्तक-स्नेहः, मस्तिष्कः (पु न), मातुलुङ्गकः (+न) ॥

४. 'हड्डी'के १२ नाम हैं—अस्थि (न), कुल्यम् (पु न), भारद्वाजम्, मेदस्तेजः (-जस्), मज्जकृत्, मांसपित्तम्, श्वदयितम्, कर्करः, देहधारकम्, मेदोजम्, कीकसम्, सारः (+हड्डम) ॥

५. 'मस्तककी हड्डी'का १ नाम है—करोटिः (स्त्री) ॥

६. 'कपाल, खोपड़ी'के २ नाम हैं—कपालम् (पु न । +शकलम्), कर्परः ॥

७. 'पीठकी हड्डी'का १ नाम है—कशेरुका (स्त्री न । + कशारुका, कशारु) ॥

८. 'नलिका—छोटी २ हड्डियों'का १ नाम है—नलकम् ॥

९. 'पंजड़ी (दोनों पार्श्वभागोंकी हड्डी)'के २ नाम हैं—वङ्क्रिः (स्त्री), पर्शुका ॥

१०. 'कंकाल (शरीरकी हड्डी)'के ३ नाम हैं—करङ्कः, कङ्कालम् (पु न), अस्थिपञ्जरः ॥

११. 'मज्जा'के ५ नाम हैं—मजा (-जन्, पु । +स्त्री पु । + मज्जा-ज्जा, स्त्री), कौशिकः, शुक्रकरः, अस्थिस्नेहः, अस्थिसम्भवः (+अस्थितेजः,-जस्) ॥

१शुक्रं रेतो बलं बीजं वीर्यं मज्जसमुद्भवम् ।
आनन्दप्रभवं पुंस्त्वमिन्द्रियं किट्टवर्जितम् ॥ २९३ ॥
पौरुषं प्रधानधातुर्२लोम रोम तनूरुहम् ।
३त्वक्छविश्छादनी कृत्तिश्चर्माऽजिनमसृग्धरा ॥ २९४ ॥
४वस्नसा तु स्नसा स्नायु५र्नाड्यो धमनयः सिराः ।
६कण्डरा तु महास्नायु७र्मलं किट्टं ८तदक्षिजम् ॥ २९५ ॥
दूषीका दूषिका ९जैह्वं कुलुकं—

---

१. 'वीर्य, शुक्र'के १२ नाम हैं—शुक्रम्, रेतः (-तस् न), बलम्, बीजम्, वीर्यम्, मज्जसमुद्भवम्, आनन्दप्रभवम्, पुंस्त्वम्, इन्द्रियम्, किट्टवर्जितम्, पौरुषम्, प्रधानधातुः ॥

२. 'रोएं'के ३ नाम हैं—लोम, रोम (२-मन् न), तनूरुहम् (पु न) ॥

शेषश्चात्र—रोमणि तु त्वग्मलं वालपुत्रकः । कूपजो मांसनिर्यासः परित्राणम् ॥

३. 'चमड़ा (सादृश्योपचारसे छिलका)'के ७ नाम हैं—त्वक् (-च्), छविः (२ स्त्री), छादनी, कृत्तिः, चर्म (-र्मन्), अजिनम्, असृग्धरा ।

विमर्श—'अमरसिंह'ने 'अजिनं चर्म कृत्तिः स्त्री' (२।७।४६) वचनके द्वारा पूर्वोक्त 'कृत्ति, अजिन और चर्मन्' शब्दोंका 'मृगयोनि' होनेसे सामान्य चमड़ेसे भिन्न कहा है । अतएव "मृगा अजिनयोनयः" यह वचन तथा "तत्राजिनं मृगयोनिर्मृगाश्च प्रियकादयः । मृगप्रकरणे तेऽथ प्रोक्ता अजिनयोनयः ॥" यह वाचस्पतिके वचन भी सार्थक होते हैं ॥

४. 'अङ्ग-प्रत्यङ्गोंकी सन्धि (जोड़)'के ३ नाम हैं—वस्नसा, स्नसा (स्त्री), स्नायुः (स्त्री । +न) ॥

शेषश्चात्र—अथ स्नसा । तन्त्रनिस्वाङ्स्नावानः सन्धिबन्धनमित्यपि ।

५. 'नाड़ियों, नशों'के ३ नाम हैं—नाड्यः (+नाड्यः), धमनयः (स्त्री), सिराः । (बहुत्वकी अपेक्षासे ब० व० कहा गया है, अतः ए० व० भी होता है) ॥

६. 'महास्नायु (वैद्योंके मत में—स्नायुसमूह)'के २ नाम हैं—कण्डरा, महास्नायुः ॥

७. 'मैल'के २ नाम हैं—मलम्, किट्टम् (२ पु न) ॥

८. 'कीचर (आँखको मैल)'के २ नाम हैं—दूषीका, दूषिका ॥

९. 'जीभकी मैल'का १ नाम है—कुलुकम् ॥

—१पिप्पिका पुनः ।
दन्त्यं २कार्णं तु पिञ्जूषः ३शिङ्घाणो घ्राणसंभवम् ॥ २६६ ॥
४सृणीका स्यन्दिनी लालाऽऽस्यास्रवः कफकूर्चिका ।
५मूत्रं बस्तिमलं मेहः प्रस्रावो नृजलं स्रवः ॥ २६७ ॥
६पुष्पिका तु लिङ्गमलं ७विड् विष्ठाऽवस्करः शकृत् ।
गूथं पुरीषं शमलोच्चारौ वर्चस्कवर्चसी ॥ २६८ ॥
८वेषो नेपथ्यमाकल्पः ९परिकर्माङ्गसंस्क्रिया ।
१०उद्वर्तनमुत्सादन११मङ्गरागो विलेपनम् ॥ २६९ ॥
१२चर्चिक्यं समालभनं चर्चा स्याद् १३मण्डनं पुनः ।
प्रसाधनं प्रतिकर्म—

---

१. 'दाँतकी मैल'का १ नाम है—पिप्पिका ॥

२. 'खोंट (कानकी मैल)'का १ नाम है—पिञ्जूषः ॥

३. 'नेटा, नकटी (नाककी मैल)'का १ नाम है—शिङ्घाणः (+शिङ्घाणकः) ॥

४. लार'के ५ नाम हैं—सृणीका (+सृणिका), स्यन्दिनी, लाला, आस्यास्रवः, कफकूर्चिका ॥

५. 'मूत्र, पेशाब'के ६ नाम हैं—मूत्रम्, बस्तिमलम्, मेहः, प्रस्रावः, नृजलम्, स्रवः ॥

६. 'पुष्पिका (लिङ्गकी श्वेत वर्ण मैल)'का १ नाम है—पुष्पिका ॥

७. 'विष्ठा, मैला'के १० नाम हैं—विट् (-श्, स्त्री । + स्त्री न । + विट्=विष्, स्त्री), विष्ठा, अवस्करः, शकृत् (न), गूथम् (पु न), पुरीषम्, शमलम्, उच्चारः, वर्चस्कम् (पु न), वर्चः (-र्चस् । + अशुचि) ॥

८. 'वेष या भूषण'के ३ नाम हैं—वेषः (पु न । + वेशः), नेपथ्यम्, आकल्पः ॥

९. 'शरीरका संस्कार करना' (उबटन, साबुन आदिसे स्वच्छ करने)'का १ नाम है—परिकर्म (-र्मन्) ॥

१०. 'उबटन लगाने'के २ नाम हैं—उद्वर्तनम्, उत्सादनम् (+ उच्छादनम्) ॥

११. 'कस्तूरी, कुङ्कुम आदि लपेटना'के २ नाम हैं—अङ्गरागः, विलेपनम् ॥

१२. 'चन्दन आदिका तिलक करने'के ३ नाम हैं—चर्चिक्यम्, समालभनम्, चर्चा ॥

१३. 'शृङ्गार करना, सजाना (स्तन-कपोलादिपर पत्रमकरिकादिकी रचना करना)'के ३ नाम हैं—मण्डनम्, प्रसाधनम्, प्रतिकर्म (-र्मन्) ॥

—१मार्ष्टिः स्याद् मार्जना मृजा ॥ ३०० ॥
२वासयोगस्तु चूर्णं स्यान् ३पिष्टातः पटवासकः ।
४गन्धमाल्यादिना यस्तु संस्कारः सोऽधिवासनम् ॥ ३०१ ॥
५निर्वेश उपभोगो६ऽथ स्नानं सवनमाप्लवः ।
७कर्पूरागुरुकक्कोलकस्तूरीचन्दनद्रवैः ॥ ३०२ ॥
स्याद् यक्षकर्दमो मिश्रै८र्वर्तिर्गात्रानुलेपनी ।
९चन्दनागरुकस्तूरीकुङ्कुमैस्तु चतुःसमम् ॥ ३०३ ॥
१०अगुर्वगरुराजार्हं लोहं कृमिजवंशिके ।
अनार्यजं जोङ्गकं च—

---

१. 'स्वच्छ (साफ) करना'के ३ नाम हैं—मार्ष्टिः, मार्जना मृजा ॥

२. 'सुगन्धित (सुवासित) करनेवाले चूर्ण'के २ नाम हैं—वासयोगः, चूर्णम् (पु न) ॥

३. 'कपड़ेको सुवासित करनेवाले फूल या चूर्णादि'के २ नाम हैं—पिष्टातः, पटवासकः ॥

४. 'सुगन्धित पदार्थ या माला आदिसे सुवासित करने'का १ नाम है—अधिवासनम् ।

५. 'उपभोग'के २ नाम हैं—निर्वेश', उपभोगः ॥

६. 'स्नान, नहाना'के ३ नाम हैं–स्नानम् , सवनम्, आप्लवः (+आप्लावः) ॥

७. कर्पूर, अगर, कक्कोल, कस्तूरी और चन्दनद्रवको मिश्रितकर बनाया गया (सुगन्धपूर्ण) लेप-विशेष'का १ नाम है—यक्षकदमः ।

विमर्श—धन्वन्तरिका कथन है कि—कुङ्कुम, अगर, कस्तूरी, कर्पूर और चन्दनको मिलाकर बनाये गये अत्यन्त सुगन्धयुक्त लेपविशेषका नाम 'यक्ष-कर्दम' है ॥

८. 'वत्ती' (नाटकादि में पात्रोंके शरीरसंस्कारार्थ लगाये जानेवाले लेप-विशेषकी वत्ती'के २ नाम हैं—वर्तिः (स्त्री), गात्रानुलेपनी ॥

९. 'समान भाग चन्दन, अगर, कस्तूरी और कुङ्कुमके मिश्रणसे बनाये गये और लेप विशेष'का १ नाम है—चतुःसमम् ॥

१०. 'अगर'के ८ नाम हैं—अगुरु, अगरु (२ पु न), राजार्हम् , लोहम् (पु न), कृमिजम् (+कृमिजग्धम्), वंशिका (स्त्री न), अनार्यजम् , जोङ्गकम् ।

शेषश्चात्र—अगुरौ प्रवरं शृङ्गं शीर्षकं मृदुलं लघु ।
वरद्रुमः परमदः प्रकरं गन्धदारु च ॥

—१मङ्गल्या मल्लिगन्धि यत् ॥ ३०४ ॥
२कालागरुः काकतुण्डः ३श्रीखण्डं रोहणद्रुमः ।
गन्धसारो मलयजश्चन्दने ४हरिचन्दने ॥ ३०५ ॥
तैलपर्णिकगोशीर्षौ ५पत्राङ्गं रक्तचन्दनम् ।
कुचन्दनं ताम्रसारं रञ्जनं तिलपर्णिका ॥ ३०६ ॥
६जातिकोशं जातिफलं ७कर्पूरो हिमवालुका ।
घनसारः सिताभ्रश्च चन्द्रो ८ऽथ मृगनाभिजा ॥ ३०७ ॥
मृगनाभिर्मृगमदः कस्तूरी गन्धधूल्यपि ।
९कश्मीरजन्म घुसृणं वर्णं लोहितचन्दनम् ॥ ३०८ ॥
वाह्लीकं कुङ्कुमं वह्निशिखं कालेयजागुडे ।
सङ्कोचपिशुनं रक्तं धीरं पीतनदीपने ॥ ३०९ ॥

---

१. 'मल्लिकाके फूलके समान गन्धवाले अगर'का १ नाम है—मङ्गल्या ॥

२. 'काले अगर'के २ नाम हैं—कालागरुः, काकतुण्डः ॥

३. 'चन्दन'के ५ नाम हैं—श्रीखण्डम्, रोहणद्रुमः, गन्धसारः, मलयजः, चन्दनः, (२ पु न) ॥

शेषश्चात्र—चन्दने पुनरेकाङ्गं भद्रश्रीः फलकीत्यपि ।

४. 'हरिचन्दन'के ३ नाम हैं—हरिचन्दनम् (पु न), तैलपर्णिकः, गोशीर्षः (२ पु । + १ न) ॥

५. 'रक्तचन्दन'के ६ नाम हैं—पत्राङ्गम्, रक्तचन्दनम्, कुचन्दनम्, ताम्रसारम्, रञ्जनम्, तिलपर्णिका ॥

६. 'जायफल'के २ नाम हैं—जातिकोशम् (+जातीकोशम्, जातिकोषम्, जातीकोषम्), जातिफलम् (+जातीफलम्, जातिः, फलम्) ॥

शेषश्चात्र—जातीफले सौमनसं पुटकं मदशौण्डकम् ।
कोशफलम् ।

७. 'कपूर'के ५ नाम हैं—कर्पूरः (पु न), हिमवालुका, घनसारः, सिताभ्रः, चन्द्रः (पु न । 'चन्द्र'के पर्याय-वाचक सभी नाम) ॥

८. 'कस्तूरी'के ५ नाम हैं—मृगनाभिजा, मृगनाभिः (स्त्री), मृगमदः, कस्तूरी, गन्धधूली ॥

९. 'कुंकुम'के १४ नाम हैं—कश्मीरजन्म (-न्मन्), घुसृणम्, वर्णम् (+वर्ण्यम्), लोहितचन्दनम्, वाह्लीकम् (+वाह्लिकम्), कुङ्कुमम् (न + पु), वह्निशिखम्, कालेयम्, जागुडम्, संकोचपिशुनम् (सङ्कोचम्, पिशुनम्), रक्तम्, धीरम्, पीतनम्, दीपनम् ॥

१लवङ्गं देवकुसुमं श्रीसंज्ञ२मथ कोलकम् ।
कक्कोलकं कोषफलं ३कालीयकं तु जापकम् ॥ ३१० ॥
४यक्षधूपो बहुरूपः सालवेष्टोऽग्निवल्लभः ।
सर्जमणिः सर्जरसो रालः सर्वरसोऽपि च ॥ ३११ ॥
५धूपो वृकात् कृत्रिमाच्च तुरुष्कः सिल्हपिण्डकौ ।
६पायसस्तु वृक्षधूपः श्रीवासः सरलद्रवः ॥ ३१२ ॥
७स्थानात् स्थानान्तरं गच्छन् धूपो गन्धपिशाचिका ।
८स्थासकस्तु हस्तबिम्ब९मलङ्कारस्तु भूषणम् ॥ ३१३ ॥
परिष्कारऽऽभरणे च १०चूडामणिः शिरोमणिः ।

शेषश्चात्र—कुंकुमे तु करटं वासनीयकम् ।
प्रियङ्गुपीतं कावेरं घोरं पुष्परजो वरम् ॥
कुसुम्भञ्च जवापुष्पं कुसुमान्तञ्च गौरवम् ।

१. 'लवङ्ग'के ३ नाम हैं—लवङ्गम्, देवकुसुमम्, श्रीसंज्ञम् (श्री अर्थात् लक्ष्मी के पर्यायवाचक सब नाम) ॥

२. 'कक्कोल'के ३ नाम हैं—कोलकम् (+कोलम्), कक्कोलकम् (+कक्कोलम्), कोषफलम् ॥

३. 'जापक (या—'जायक') नामक गन्धद्रव्यविशेष)'के २ नाम हैं—कालीयकम् (+कालीयम्), जापकम् (+कालानुसार्यम्) ॥

४. 'राल'के ८ नाम हैं—यक्षधूपः, बहुरूपः, सालवेष्टः, अग्निवल्लभः, सर्जमणिः, सर्जरसः, रालः (पु न), सर्वरसः ॥

५. 'लोहबान'के ५ नाम हैं—वृकधूपः, कृत्रिमधूपः, तुरुष्कः (पु न ।+यावनः), सिल्हः, पिण्डकः ॥

६. 'देवदारुके निर्याससे बने हुए सुगन्धयुक्त गन्ध-विशेष'के ४ नाम हैं—पायसः, वृक्षधूपः, श्रीवासः, सरलद्रवः ॥

शेषश्चात्र—वृक्षधूपे च श्रीवेष्टो दधिक्षीरघृताह्वयः ।

७. 'एक जगहसे दूसरी जगह जानेवाले धूप-विशेष'का १ नाम है—गन्धपिशाचिका ॥

८. 'दिवाल आदिपर कुंकुम, चन्दन या चौरठसे दिये गये हाथके पांचों अंगुलियोंके छाप'के २ नाम हैं—स्थासकः, हस्तबिम्बम् ॥

९. 'आभूषण, गहना, जेवर'के ४ नाम हैं—अलङ्कारः, भूषणम् (पु न), परिष्कारः, आभरणम् ॥

१०. 'चूडामणि'के २ नाम हैं—चूडामणिः, शिरोमणिः (+चूडारत्नम्, शिरोरत्नम्) ॥

१नायकस्तरलो हारान्तर्मणिर्२मुकुटं पुनः ॥ ३१४ ॥
मौलिः किरीटं कोटीरमुष्णीषं ३पुष्पदाम तु ।
मूर्ध्नि माल्यं माला स्रग् ४गर्भकः केशमध्यगम् ॥ ३१५ ॥
५प्रभ्रष्टकं शिखालम्बि ६पुरोन्यस्तं ललामकम् ।
७तिर्यग् वक्षसि वैकक्षं ८प्रालम्बमृजुलम्बि यत् ॥ ३१६ ॥
९सन्दर्भो रचना गुम्फः श्रन्थनं ग्रन्थनं समाः ।
१०तिलके तमालपत्रचित्रपुण्ड्रविशेषकाः ॥ ३१७ ॥
११आपीडशेखरोत्तंसाऽवतंसाः शिरसः स्रजि ।

---

१. 'मालाके बीचवाले सामान्यसे कुछ बड़े दाने'के ३ नाम हैं—नायकः, तरलः, हारान्तर्मणिः ॥

२. 'मुकुट'के ५ नाम हैं—मुकुटम् (न । ÷पु न ।+मकुटः), मौलिः (पु स्त्री), किरीटम्, कोटीरम्, उष्णीषम् (३ पु न) ॥

३. 'मस्तकस्थ फूलकी माला'के ३ नाम हैं—माल्यम्, माला, स्रक् (—ज्) ॥

४. 'बालों'के बीचमें स्थापित फूलकी माला'का १ नाम है—गर्भकः ॥

५. 'चोटीसे लटकनेवाली फूलोंकी माला'का १ नाम है—प्रभ्रष्टकम् ॥

६. 'सामने लटकती हुई फूलोंकी माला'का १ नाम है—ललामकम् ॥

७. 'छातीपर तिर्छी लटकती हुई फूलकी माला'का १ नाम है—वैकक्षम् ॥

८. 'कण्ठसे छातीपर सीधे लटकती हुई फूलोंकी माला'का १ नाम है—प्रालम्बम् ॥

९. 'माला (हार आदि) बनाने (गूथने)'के ५ नाम हैं—सन्दर्भः, रचना, गुम्फः, श्रन्थनम्, ग्रन्थनम् ॥

शेषश्चात्र—रचनायां परिस्पन्दः प्रतियत्नः ।

१०. 'तिलक (ललाट, कपोल आदिपर लगाये गये चन्दनादिकी विविध रचना)'के ५ नाम हैं—तिलकम् (पु न), तमालपत्रम्, चित्रम् (+चित्रकम्), पुण्ड्रम्, विशेषकम् (पु न) ॥

विमर्श—उक्त पाँच पर्यायोंके विभिन्न प्रकारकी तिलकरचनाके अर्थमें प्रयुक्त होनेपर भी यहाँ विशेष भेद नहीं होनेसे इन की गणना पर्यायमें की गयी है ॥

११. 'शिरपर लपेटी हुई माला'के ४ नाम हैं—आपीडः, शेखरः, उत्तंसः, अवतंसः (+वतंसः । सब पु न) ॥

१उत्तरौ कर्णपूरेऽपि २पत्त्रलेखा तु पत्त्रतः ॥ ३१८ ॥
भङ्गिवल्लिलताङ्गुल्यः ३पत्त्रपाश्या ललाटिका ।
४बालपाश्या पारितथ्या ५कर्णिका कर्णभूषणम् ॥ ३१९ ॥
६ताटङ्कस्तु ताडपत्रं कुण्डलं कर्णवेष्टकः ।
७उत्क्षिप्तिका तु कर्णान्दुर्८बालिका कर्णपृष्ठगा ॥ ३२० ॥
९ग्रैवेयकं कण्ठभूषा १०लम्बमाना ललन्तिका ।
११प्रालम्बिका कृता हेम्नो१२रःसूत्रिका तु मौक्तिकैः ॥ ३२१ ॥

---

१. 'कर्णपूर (कानपर लटकती हुई माला)'के २ नाम हैं— उत्तंसः, अवतंस: (२ पु न) ॥

२. 'स्त्रियोंके कपोल तथा स्तनोंपर कस्तूरी-कुंकुम-चन्दनादिसे रचित पत्राकार रचना-विशेष'के ५ नाम हैं—पत्रलेखा, पत्रभङ्गिः, पत्रवल्लिः, पत्रलता, पत्राङ्गुली (+ पत्रवल्लरी, पत्रमञ्जरी,······) ॥

३. 'स्वर्णपत्रादिसे निर्मित स्त्रियोंका ललाट भूषण'के २ नाम हैं—पत्रपाश्या, ललाटिका ॥

४. 'स्त्रियोंके बाल बाँधनेके लिये मोतियोंकी लड़ी, या पुष्पमाला या प्रफुल्ल लतादि'के २ नाम हैं—बालपाश्या, पारितथ्या (+ पायतिथ्या) ॥

५. 'कर्णभूषण'के २ नाम हैं—कर्णिका, कर्णभूषणम् ॥

६. 'कुण्डल'के ४ नाम हैं— ताटङ्कः, ताडपत्रम् , कुण्डलम् (पु न), कर्णवेष्टकः ॥

विमर्श—"ताटङ्कः, ताडपत्रम्' ये २ नाम 'तरकी या कनफूलके और 'कुण्डलम् , कर्णवेष्टकः'—ये २ नाम 'कुण्डल'के हैं" यह भी किसी-किसीका मत है ॥

शेषश्चात्र—अथ कुण्डले । कर्णादर्शः ॥

७. 'कानकी सिकड़ी (सोने आदि की बनी हुई जंजीर)'के २ नाम हैं—उत्क्षिप्तिका, कर्णान्दुः (स्त्री । + कर्णान्दूः) ॥

८. 'बाली (कानके पीछे तक भी पहने जानेवाला गोलाकार भूषण विशेष)'का १ नाम है—बालिका ॥

९. 'कण्ठके भूषण (कंठा, हंसुली, टीक आदि)'के २ नाम हैं—ग्रैवेयकम्, कण्ठभूषा ॥

१०. 'गर्दनसे नीचे लटकनेवाले भूषण (हलका, चन्द्रहार आदि)'का १ नाम है—ललन्तिका ॥

११. 'सोनेके बने हुए कण्ठभूषण'का १ नाम है—प्रालम्बिका ॥

१२. 'मोतीके बने हुए कण्ठभूषण'का १ नाम है—उरःसूत्रिका ॥

१हारो मुक्तावः प्रालम्बस्रक्कलापावलीलताः ।
२देवच्छन्दः शतं ३साष्टं त्विन्द्रच्छन्दः सहस्रकम् ॥ ३२२ ॥
४तदर्धं विजयच्छन्दो ५हारस्त्वष्टोत्तरं शतम् ।
६अर्धं रश्मिकलापोऽस्य ७द्वादश त्वर्धमाणवः ॥ ३२३ ॥
८द्विर्द्वादशार्धगुच्छः स्यात् ९पञ्च हारफलं लवाः ।
१०अर्धहारश्चतुःषष्टि११र्गुच्छमाणवमन्दराः ॥ ३२४ ॥
अपि गोस्तनगोपुच्छावर्धमर्धं यथोत्तरम् ।
१२इति हारा यष्टिभेदा१३देकावल्येकयष्टिका ॥ ३२५ ॥
कण्ठिकाऽप्य—

---

१. 'हार, मोतीकी माला'के ६ नाम हैं—हारः (पु स्त्री), मुक्ता-प्रालम्बः, मुक्तास्रक् (–स्रज्), मुक्ताकलापः, मुक्तावली, मुक्तालता ॥

२. 'सौ लड़ीवाली मोतीकी माला'का १ नाम है—देवच्छन्दः ॥

३. 'एक हजार आठ लड़ीवाली मोतीकी माला'का १ नाम है—इन्द्रच्छन्दः ॥

४. 'उसके आधी (५५४) लड़ीवाली मोतीकी माला'का १ नाम है—विजयच्छन्दः ॥

५. 'एक सौ आठ लड़ीवाली मोतीकी माला'का १ नाम है—हारः ॥

६. 'उसके आधी (५४) लड़ीवाली मोतीकी माला'का १ नाम है—रश्मिकलापः ॥

७. 'बारह लड़ीवाली मोतीकी माला'का १ नाम है—अर्धमाणवः ॥

८. 'चौबीस लड़ीवाली मोतीकी माला'का १ नाम है—अर्धगुच्छः ॥

९. 'पाच लड़ीवाली मोतीकी माला'का १ नाम है—हारफलम् ॥

१०. 'चौसठ लड़ीवाली मोतीकी माला'का १ नाम है—अर्धहारः ॥

११. 'बत्तीस, सोलह, आठ, चार और दो लड़ियोंवाली मोतीकी मालाओंका क्रमशः १—१ नाम हैं—गुच्छः, माणवः, मन्दरः, गोस्तनः, गोपुच्छः ।

विमर्श—अन्य आचार्योंके मतमें ६४, ५६, ४८, ४०, ३२, १६ और ७० लड़ियोंवाली मोतीकी मालाओंका क्रमशः १—१ नाम है—हारः, रश्मिकलापः, माणवकः, अर्धहारः, अर्धगुच्छकः, कलापच्छन्दः, मन्दरः, ॥

१२. इस प्रकार लड़ियोंकी संख्याके भेदसे १४ प्रकारके हार (मोतियोंकी मालाएँ) होते हैं ॥

१३. 'एक लड़ीवाली मोतीकी माला'के ३ नाम हैं—एकावली, एकयष्टिका, कण्ठिका ॥

—१थ नक्षत्रमाला तत्संख्यमौक्तिकैः ।
२केयूरमङ्गदं बाहुभूषा३ऽथ करभूषणम् ॥ ३२६ ॥
कटको वलयं पारिहार्यावापौ च कङ्कणम् ।
हस्तसूत्रं प्रतिसर ४ऊर्मिका त्वङ्गुलीयकम् ॥ ३२७ ॥
५सा साक्षराऽङ्गुलिमुद्रा ६कटिसूत्रं तु मेखला ।
कलापो रसना सारसनं काञ्ची च सप्तकी ॥ ३२८ ॥
७सा शृङ्खलं पुंस्कटिस्था ८किङ्कणी क्षुद्रघण्टिका ।
९नूपुरं तु तुलाकोटिः पादतः कटकाङ्गदे ॥ ३२९ ॥
मञ्जीरं हंसकं शिञ्जिन्यं१०शुकं वस्त्रमम्बरम् ।
सिचयो वसनं चीराऽऽच्छादौ सिक् चेलवाससी ॥ ३३० ॥
पटः प्रोतो—

---

१. 'सत्ताइस मोतियोंकी माला'का १ नाम है—नक्षत्रमाला ॥

२. 'बिजायठ, बाजूबन्द (बांहके भूषण)'के ३ नाम हैं—केयूरम्, अङ्गदम् (न । + पु), बाहुभूषा ॥

३. 'कङ्कण'के ८ नाम हैं—करभूषणम्, कटकः, वलयम्, पारिहार्यः (+ पारिहार्यम्), आवापः, कङ्कणम्, हस्तसूत्रम्, प्रतिसरः (त्रि) ।

विमर्श—कुछ कोषकार 'कङ्कण'के प्रथम ५ नाम तथा 'विवाह या यज्ञादि में बांधे जानेवाले माङ्गलिक सूत्र'के अन्तिम ३ नाम हैं, ऐसा कहते हैं ॥

४. 'अंगूठी'के २ नाम हैं—ऊर्मिका, अङ्गुलीयकम् (+ अङ्गुलीयम्) ॥

५. 'नाम खुदी हुई अंगूठी'का १ नाम है—अङ्गुलिमुद्रा ॥

६. 'स्त्रियोंकी करधनी'के ७ नाम हैं—कटिसूत्रम्, मेखला, कलापः, रसना (स्त्री न), सारसनम्, काञ्ची, सप्तकी ।

७. 'पुरुषोंकी करधनी'का १ नाम है—शृङ्खलम् (त्रि) ॥

८. 'घुंघुरू'के २ नाम हैं—किङ्कणी (+ किङ्किनी), क्षुद्रघण्टिका ॥

शेषश्चात्र—अथ किङ्कण्यां घर्घरी विद्या विद्यामणिस्तथा ।

९. 'नूपुर, पायजेब'के ७ नाम हैं—नूपुरम्, तुलाकोटिः, पादकटकम् (२ पु न), पादाङ्गदम्, मञ्जीरम्, हंसकम् (२ पु न), शिञ्जिनी ॥

शेषश्चात्र—नुपुरे तु पादशीली मन्दीरं पादनालिका । (अलङ्कारशेषश्चात्र—
पादाङ्गुलीयके पादपालिका पादकीलिका ।)

१०. 'कपड़े'के १२ नाम हैं—अंशुकम्, वस्त्रम्, (पु न), अम्बरम्, सिचयः, वसनम्, चीरम्, आच्छादः (+ आच्छादनम्), सिक् (-च्, स्त्री), चेलम्, वासः (सस्), पटः (त्रि), प्रोतः ॥

—१ऽञ्चलस्यान्तो २वर्तिर्वस्तिश्च तद्दशाः ।
३पत्रोर्णं धौतकौशेयं४मुष्णीषो मूर्धवेष्टनम् ॥ ३३१ ॥
५तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ।
६त्वक्फलक्रिमिरोमभ्यः संभवात्तच्चतुर्विधम् ॥ ३३२ ॥
क्षौमकार्पासकौशेयराङ्कवादिविभेदतः ।
७क्षौमे दुकूलं दुगूलं स्यान्८कार्पासं तु बादरम् ॥ ३३३ ॥
९कौशेयं कृमिकोशोत्थं १०राङ्कवं मृगरोमजम् ।
११कम्बलः पुनरूर्णायुराविकौरभ्ररल्लकाः ॥ ३३४ ॥

शेषश्चात्र— वस्त्रे निवसनं वस्त्रं सत्रं कर्पटमित्यपि ।

१. 'कपड़ेके आँचर (छोर)'का १ नाम है—अञ्चलः (पु न) ॥

२. 'कपड़ेकी किनारी (धारी)'के ३ नाम हैं—वर्तिः, वस्तिः (२ पु स्त्री), दशाः (नि. स्त्री ब. व.) ॥

शेषश्चात्र—दशास्तु वस्त्रपेश्यः ।

३. 'रेशमी वस्त्र'के २ नाम हैं—पत्रोर्णम् , धौतकौशेयम् ॥

४. 'पगड़ी, या मुरेठा' (शिरपर बाँधे जानेवाले कपड़े)'के २ नाम हैं—उष्णीषः (पु न), मूर्धवेष्टनम् (+ शिरोवेष्टनम्) ॥

५. 'धुले हुए कपड़े'का १ नाम है—उद्गमनीयम् ।

विमर्श—यहां युग शब्दके विवक्षित नहीं होनेसे धुले हुए एक कपड़ेके अर्थमें भी 'उद्गमनीय' शब्दका प्रयोग मिलता है । यथा—"गृहीतपत्युद्गमनीयवस्त्रा—" (कु० सं० ७।११); अतएव 'भागुरि'ने—"धौतेऽरुद्गमनीयं तु धौतवस्त्रमुदाहृतम्" तथा 'हलायुध'ने—"धौतमुद्गमनीयञ्च—(अ० रत्नमाला २।३६६)"कहा है ॥

६. '(तीसी आदिका) छिलका, (कपास आदिका) फल, (रेशमका) कीड़ा और (भेड़ आदिका) रोआं—इन चार वस्तुओंसे बनानेवाले वस्त्रों'का क्रमशः १-१ नाम है—क्षौमम् , कार्पासम् , कौशेयम् , राङ्कवम् ॥ (अत एव वस्त्रके ४ भेद हैं) ॥

७. 'तीसी आदिके डण्ठलके छिलके से बननेवाले कपड़े'के ३ नाम हैं—क्षौमम् (पु न), दुकूलम् , दुगूलम् ॥

८. 'कपास (रुई) आदिके फलसे बननेवाले कपड़े'के २ नाम हैं—कार्पासम् , बादरम् ॥

९. 'रेशमके कीड़े आदिसे बननेवाले कपड़े'का १ नाम है—कौशेयम् ॥

१०. 'रङ्कु नामक मृगके रोएंसे बननेवाले कपड़े'का १ नाम है—राङ्कवम् ॥

११. कम्बल'के ५ नाम हैं—कम्बलः (पु न), ऊर्णायुः (-युस् , पु), आविकः, औरभ्रः, रल्लकः ॥

१नवं वासोऽनाहतं स्यात्तन्त्रकं निष्प्रवाणि च ।
२प्रच्छादनं प्रावरणं संव्यानं चोत्तरीयकम् ॥ ३३५ ॥
३वैकक्षे प्रावारोत्तरासङ्गौ बृहतिकाऽपि च ।
४वराशिः स्थूलशाटः स्यात् ५परिधानं त्वधोंऽशुकम् ॥ ३३६ ॥
अन्तरीयं निवसनमुपसंव्यानमित्यपि ।
६तद्ग्रन्थिरुच्चयो नीवी ७वरस्त्र्यर्धोरुकांशुकम् ॥ ३३७ ॥
चण्डातकं चलनकः ८चलनी त्वितरस्त्रियाः ।
९चोलः कञ्चुलिका कूर्पासकोऽङ्गिका च कञ्चुके ॥ ३३८ ॥
१०शाटी चोट्य११थ नीशारो हिमवातापहांशुके ।
१२कच्छा कच्छाटिका कक्षा परिधानाऽपराञ्चले ॥ ३३९ ॥

---

१. (बिना धुले तथा बिना पहने हुए) 'नये कपड़े'के ३ नाम हैं—अनाहतम्, तन्त्रकम्, निष्प्रवाणि (सब त्रि) ॥

२. 'दुपट्टा, चद्दर'के ४ नाम हैं—प्रच्छादनम्, प्रावरणम्, संव्यानम्, उत्तरीयकम् ॥

३. 'छातीपर तिर्छे रखे हुए चादर'के ४ नाम हैं—वैकक्षम्, प्रावारः, उत्तरासङ्गः, बृहतिका ॥

४. 'मोटी साड़ी'के २ नाम हैं—वराशिः (पु + वरासिः) स्थूलशाटः (+स्थूलशाटकः) ॥

५. 'धोती (कमरसे नीचे पहने जानेवाले कपड़े)'के ५ नाम हैं—परिधानम्, अधोंऽशुकम् (+ अधोवस्त्रम्), अन्तरीयम्, निवसनम्, उपसंव्यानम् ॥

६. 'नीवी (कमरसे नीचे पहनी गयी साड़ी की गांठ'के २ नाम हैं—उच्चयः, नीवी ॥

७. 'साया (उत्तम स्त्रियोंके साड़ीके नीचे पहने जानेवाले लहंगेके वस्त्र)'के २ नाम हैं—चण्डातकम्, चलनकः ॥

८. 'सामान्य स्त्रियोंकी साड़ीके नीचे पहने जानेवाले वस्त्र'का १ नाम है—चलनी ॥

९. 'स्त्रियों की चोली-ब्लाउज आदि'के ५ नाम हैं—चोलः, कञ्चुलिका, कूर्पासकः (+कूर्पासः), अङ्गिका, कञ्चुकः (पु न) ॥

१०. 'स्त्रियोंकी साड़ी'के २ नाम हैं—शाटी (पु न । + शाटः, शाटकः), चोटी (+ चोटः पु स्त्री) ॥

११. 'रजाई'का १ नाम है—नीशारः ॥

१२. 'धोतीकी लांग (पछुआ, ढेका)'के ३ नाम हैं—कच्छा, कच्छाटिका (कच्छाटी, पु स्त्री), कक्षा ॥

१कक्षापटस्तु कौपीनं २समौ नक्तककर्पटौ ।
३निचोलः प्रच्छदपटो निचुलश्चोत्तरच्छदः ॥ ३४० ॥
४उत्सवेषु सुहृद्भिर्यद् बलादाकृष्य गृह्यते ।
वस्त्रमाल्यादि तत्पूर्णपात्रं पूर्णानकं च तत् ॥ ३४१ ॥
५तत्तु स्यादाप्रपदीनं व्याप्नोत्याप्रपदं हि यत् ।
६चीवरं भिक्षुसङ्घाटी ७जीर्णवस्त्रं पटच्चरम् ॥ ३४२ ॥
८शाणी गोणी छिद्रवस्त्रे ९जलार्द्रा क्लिन्नवाससि ।
१०पर्यस्तिका परिकरः पर्यङ्कश्चावसक्थिका ॥ ३४३ ॥
११कुथे वर्णः परिस्तोमः प्रवेणीनवतास्तराः ।

---

१. 'कौपीन, लंगोटी'के २ नाम हैं—कक्षापटः (+कक्षापुटः), कौपीनम् ॥

२. 'पानी, आदि छाननेका कपड़ा (छनना या—छननेके समान कपड़ेका टुकड़ा'के २ नाम हैं—नक्तकः, कर्पटः (पु न) ॥

३. 'गद्दी आदिपर बिछानेका चादर, पलंगपोश'के ४ नाम हैं—निचोलः, प्रच्छदपटः, निचुलः, (+निचुलकम् , पु न), उत्तरच्छदः ॥

४. 'पुत्रोत्पत्ति या विवाहादि उत्सवके समय मित्रों (या-प्रिय नौकर आदि)के द्वारा हठपूर्वक जो कपड़ा या माला (हार) आदि छीन लिया जाता है, उस (कपड़े या माला आदि)'के २ नाम हैं—पूर्णपात्रम्, पूर्णानकम् ॥

५. 'पैरकी घुट्टीतक पहुँचनेवाले वस्त्र (पाजामा, अँगरखा या कुर्ता)'का १ नाम है—आप्रपदीनम् ॥

६. 'मुनि या साधु आदिके (नीचे तक पहने जानेवाले) वस्त्र'के २ नाम हैं—चीवरम्, भिक्षुसङ्घाटी ॥

७. 'पुराने वस्त्र'का १ नाम है—पटच्चरम् ॥

८. 'जालीदार कपड़े'के २ नाम हैं—शाणी, गोणी ॥

९. 'भींगे हुए कपड़े'का १ नाम है—जलार्द्रा ॥

१०. 'विशेष ढंगसे बैठकर पीठ और दोनों घुटनोंको बांधनेवाले गमछी आदि कपड़े'के ४ नाम हैं—पर्यस्तिका, परिकरः, पर्यङ्कः (+पल्यङ्कः), अवसक्थिका ॥

११. 'हाथी आदिके झूल या-रथ आदिके पर्दे' के ६ नाम हैं—कुथः (त्रि), वर्णः, परिस्तोमः (+वर्णपरिस्तोमः), प्रवेणी, नवतम्, आस्तरः (+आस्तरणम्) ॥

१अपटी काण्डपटः स्यात् प्रतिसीरा जवन्यपि ॥ ३४४ ॥
तिरस्करिण्य२थोल्लोचो वितानं कदकोऽपि च ।
चन्द्रोदये ३स्थुलं दूष्ये ४केणिका पटकुट्यपि ॥ ३४५ ॥
गुणलयनिकायां स्यात् ५संस्तरस्रस्तरौ समौ ।
६तल्पं शय्या शयनीयं शयनं तलिमं च तत् ॥ ३४६ ॥
७मञ्चमञ्चकपर्यङ्कपल्यङ्काः खट्वया समाः ।
८उच्छीर्षकमुपाद् धानबर्हौ ९पाल पतद्ग्रहः ॥ ३४७ ॥
प्रतिग्राहो १०मकुरात्मदर्शाऽऽदर्शास्तु दर्पणे ।
११स्याद्वेत्रासनमासन्दी १२विष्टरः पीठमासनम् ॥ ३४८ ॥

---

१. 'पर्दा'के ५ नाम हैं—अपटी, काण्डपटः, प्रतिसीरा, जवनी (+यमनी, जवनिका), तिरस्करिणी ॥

२. 'चँदोवा, चाँदनी'के ४ नाम हैं—उल्लोचः, वितानम् (पु न), कदकः, चन्द्रोदयः ॥

३. 'तम्बू, सामियाना'के २ नाम हैं—स्थूलम्, दूष्यम् ॥

४. 'टेण्ट (कपड़ेके घर)'के ३ नाम हैं—केणिका, पटकुटी, गुणलयनिका

५. 'पलङ्ग आदिके बिछौने'के २ नाम हैं—संस्तरः (+प्रस्तरः), स्रस्तरः ॥

६. 'शय्या'के ५ नाम हैं—तल्पम् (पु न), शय्या, शयनीयम्, शयनम (पु न), तलिमम् ॥

७. 'मचान'के ५ नाम हैं—मञ्चः, मञ्चकः (पु न), पर्यङ्कः, पल्यङ्कः, खट्वा ॥

८. 'तकिया, मसनंद'के ३ नाम हैं—उच्छीर्षकम्, उपधानम्, उपबर्हम् ॥

९. 'पिकदान, उगलदान'के ३ नाम हैं—पालः (पु । +न), पतद्ग्रहः (+पतद्ग्राहः), प्रतिग्राहः (+प्रतिग्रहः) ॥

१०. 'दर्पण, आइना'के ४ नाम हैं—मुकुरः (+मकुरः, मकुरः), आत्मदर्शः, आदर्शः, दर्पणः ॥

११. 'बेंतका आसन या—कुर्सी'के २ नाम हैं—वेत्रासनम्, आसन्दी ॥

१२. 'पीढ़ा या चौकी आदि बैठनेका साधन-विशेष'के ३ नाम हैं—विष्टरः (पु न), पीठम् (न स्त्री), आसनम् (पु न) ॥

१कसिपुर्भोजनाच्छादा २औशीरं शयनासने।
३लाक्षा द्रुमामयो राक्षा रङ्गमाता पलङ्कषा ॥ ३४६ ॥
जतु क्षतघ्ना कृमिजा ४यावालक्तौ तु तद्रसः।
५अञ्जनं कज्जलं ६दीपः प्रदीपः कज्जलध्वजः ॥ ३५० ॥
स्नेहप्रियो गृहमणिर्दशाकर्षो दशेन्धनः।
७व्यजनं तालवृन्तं ८तद् धवित्रं मृगचर्मणः ॥ ३५१ ॥
९आलावर्तं तु वस्त्रस्य १०कङ्कतः केशमार्जनः।
प्रसाधनश्चा११थ बालक्रीडनके गुडो गिरिः ॥ ३५२ ॥
गिरियको गिरिगुडः १२समौ कन्दुकगेन्दुकौ।
१३राजा राट् पृथिवीशक्रमध्यलोकेशभूभृतः ॥ ३५३ ॥

---

१. 'खाना-कपड़ा (एक साथ कथित भोजन तथा वस्त्र)'का १ नाम है—कसिपुः (+कशिपुः) ॥

२. 'एक साथ कथित शयन और आसन'का १ नाम है—औशीरम् ॥

३. 'लाख, लाह'के ८ नाम हैं—लाक्षा, द्रुमामयः, राक्षा, रङ्गमाता (-मातृ), पलङ्कषा, जतु (न), क्षतघ्ना, कृमिजा ॥

४. 'अलक्तक, महावर'के २ नाम हैं—यावः (+यावकः), अलक्तः (+अलक्तकः)। (किसी २ के मतमें 'लाक्षा'में यहांतक सब शब्द एकार्थक हैं) ॥

५. 'काजल, अञ्जन'के २ नाम हैं—अञ्जनम्, कज्जलम् ॥

६. 'दीप, दिया'के ७ नाम हैं—दीपः (पु न।+दीपक), प्रदीपः, कज्जलध्वजः, स्नेहप्रियः, गृहमणिः, दशाकर्षः, दशेन्धनः ॥

७. 'पंखा, ताड़का पङ्खा'के २ नाम हैं—व्यजनम् (+वीजनम्), तालवृन्तम् ॥

८. 'मृगचर्मके पङ्खे'का १ नाम है—धवित्रम्। (इस पंखेका यज्ञमें उपयोग होता है)॥

९. 'कपड़ेके पङ्खे'का १ नाम है—आलावर्तम् ॥

१०. 'कङ्घी'के ३ नाम हैं—कङ्कतः (त्रि) केशमार्जनः, प्रसाधनः ॥

११. 'बच्चोंके खिलौने'के ५ नाम हैं—बालक्रीडनकम्, गुडः, गिरिः (पु), गिरियकः (+गिरीयकः, गिरिकः), गिरिगुडः ॥

१२. 'गेंद'के २ नाम हैं—कन्दुकः (पु न), गेन्दुकः (+गन्दुकः) ॥

१३. 'राजा'के ११ नाम हैं—राजा (-जन्), राट् (-ज्), पृथिवीशक्रः,

महीक्षित् पार्थिवो मूर्धाभिषिक्तो भू-प्रजा-नृ-पः ।
१मध्यमो मण्डलाधीशः २सम्राट् तु शास्ति यो नृपान् ॥ ३५४ ॥
यः सर्वमण्डलस्येशो राजसूयं च योऽयजत् ।
३चक्रवर्ती सार्वभौम ४स्ते तु द्वादश भारते ॥ ३५५ ॥
५आर्षभिर्भरतस्तत्र ६सगरस्तु सुमित्रभूः ।
७मघवा वैजयिस्त्वथाश्वसेननृपनन्दनः ॥ ३५६ ॥
सनत्कुमारो८ऽथ शान्तिः कुन्थुररो जिना अपि ।
१०सुभूमस्तु कार्तवीर्यः ११पद्मः पद्मोत्तरात्मजः ॥ ३५७ ॥
१२हरिषेणो हरिसुतो १३जयो विजयनन्दनः ।
१४ब्रह्मसूनुर्ब्रह्मदत्तः—

मध्यलोकेशः, भूभृत, महीक्षित्, पार्थिवः, मूर्धाभिषिक्तः (+मूर्धाभिसिक्तः), भूपः, प्रजापः, नृपः (यौ०—भूपालः, लोकपालः, नरपालः,……) ॥

१. 'मध्यम राजा (किसी एक मण्डलके स्वामी)'के २ नाम हैं—मध्यमः, मण्डलाधीशः ॥

२. 'सम्राट् (बादशाह, जो सब राजाओंपर शासन करता हो, सम्पूर्ण मण्डलोंका स्वामी हो और जिसने राजसूय यज्ञ किया हो, उस)'का १ नाम है—सम्राट् (-म्राज्) ॥

३. 'चक्रवर्ती (समस्त पृथ्वीका स्वामी)'के २ नाम हैं—चक्रवर्ती (-र्तिन्), सार्वभौमः ॥

शेषश्चात्र—चक्रवर्तिन्यधीश्वरः ॥

४. वे (चक्रवर्ती राजा) भारतमें १२ हुए हैं ॥

५. (अब क्रमसे 'भरत' आदि १२ चक्रवर्तियोंके पर्यायोंको कहते हैं—) 'भरत'के २ नाम हैं—आर्षभिः, भरतः ॥

६. 'सगर'के २ नाम हैं—सगरः, सुमित्रभूः ॥

७. 'मघवा'के २ नाम हैं—मघवा (-वन्), वैजयिः ॥

८. 'सनत्कुमार'के २ नाम हैं—अश्वसेन-नृपनन्दनः, सनत्कुमारः ॥

९. उक्त 'भरत' आदि चार चक्रवर्तियोंके अतिरिक्त 'शान्ति, कुन्थु, और अर' ये तीर्थङ्कर भी 'चक्रवर्ती' हो चुके हैं ॥

१०. 'कार्तवीर्य'के २ नाम हैं—सुभूमः, कार्तवीर्यः ॥

११. 'पद्म'के २ नाम हैं—पद्मः, पद्मोत्तरात्मजः ॥

१२. 'हरिषेण'के २ नाम हैं—हरिषेणः, हरिसुतः ॥

१३. 'जय'के २ नाम हैं—जयः, विजयनन्दनः ॥

१४. 'ब्रह्मदत्त'के २ नाम हैं—ब्रह्मसूनुः, ब्रह्मदत्तः ॥

—१सर्वेऽपीक्ष्वाकुवंशजाः ॥ ३५८ ॥
२प्राजापत्यस्त्रिपृष्ठो३ऽथ द्विपृष्ठो ब्रह्मसंभवः ।
४स्वयंभू रुद्रतनयः ५सोमभूः पुरुषोत्तमः ॥ ३५६ ॥
६शैवः पुरुषसिंहो७ऽथ महाशिरःसमुद्भवः ।
८स्यात्पुरुषपुण्डरीको दत्तोऽग्निसिंहनन्दनः ॥ ३६० ॥
९नारायणो दाशरथिः १०कृष्णस्तु वसुदेवभूः ।

---

१. उक्त 'भरत' आदि ३५६—३५८ बारह चक्रवर्ती 'इक्ष्वाकु'के वंशमें उत्पन्न हुए थे (स्पष्टज्ञानार्थ निम्नोक्त चक्र देखें) ॥

भारतस्य द्वादशचक्रवर्तिनां बोधकचक्रम्

क्रमाङ्काः	चक्रवर्तिनां नामानि	चक्रवर्त्तिपितॄणां नामानि
१	भरतः	ऋषभः
२	सगरः	सुमित्रविजयः
३	मघवा	विजयः
४	सनत्कुमारः	अश्वसेनः
५	शान्तिः	विश्वसेनः
६	कुन्थुः	सूरः
७	अरः	सुदर्शनः
८	सुभूमः	कृतवीर्यः
९	पद्मः	पद्मोत्तरः
१०	हरिषेणः	हरिः
११	जयः	विजयः
१२	ब्रह्मदत्तः	ब्रह्मा

२. 'त्रिपृष्ठ'के २ नाम हैं—प्राजापत्यः, त्रिपृष्ठः ॥
३. 'द्विपृष्ठ'के २ नाम हैं—द्विपृष्ठः, ब्रह्मसम्भवः ॥
४. 'स्वयम्भू'के २ नाम हैं—स्वयम्भूः, रुद्रतनयः ॥
५. 'पुरुषोत्तम'के २ नाम हैं—सोमभूः, पुरुषोत्तमः ॥
६. 'पुरुषसिंह'के २ नाम हैं—शैवः, पुरुषसिंहः ॥
७. 'पुरुषपुण्डरीक'के २ नाम हैं—महाशिरःसमुद्भवः, पुरुषपुण्डरीकः ॥
८. 'दत्त'के २ नाम हैं—दत्तः, अग्निसिंहनन्दनः ॥
९. 'नारायण'के २ नाम हैं—नारायणः, दाशरथिः ॥
१० 'कृष्ण'के २ नाम हैं—कृष्णः, वसुदेवभूः ॥

१वासुदेवा अमी कृष्णा। नव २शुक्लाबलास्त्वमी ॥ ३६१ ॥
३अचलो विजयो भद्रः सुप्रभश्च सुदर्शनः ।
आनन्दो नन्दनः पद्मो रामो ४विष्णुद्विषस्त्वमी ॥ ३६२ ॥
५अश्वग्रीवस्तारकश्च मेरको मधुरेव च ।
निशुम्भबलिप्रह्लादलङ्केशमगधेश्वराः ॥ ३६३ ॥

---

१. 'त्रिपृष्ठ' (३५९)से यहांतक ९ अर्धचक्रवर्तियोंका कृष्ण वर्ण है ॥

२. आगे (३६२में) कहे जानेवालों का शुक्ल वर्ण है ॥

३. अचलः, विजयः, भद्रः, सुप्रभः, सुदर्शनः, आनन्दः, नन्दनः, पद्मः, राम. (इन नवोंका शुक्ल वर्ण है) ।

४. आगे (३६२में) कहे जानेवाले ९ पूर्व (३५९–३६१) कथित विष्णुरूप 'त्रिपृष्ठ' आदि ९ अर्द्धचक्रवर्तियोंके शत्रु हैं ॥

५. अश्वग्रीवः, तारकः, मेरकः, मधुः, निशुम्भः, बलिः, प्रह्लादः, लङ्केशः (रावणः). मगधेशः (जरासन्धः) । ये ९ क्रमसे त्रिपृष्ठ आदिके शत्रु हैं ॥

विमर्श—पूर्वोक्त (३५९–३६१) 'त्रिपृष्ठ' आदि ९ अर्धचक्रवर्तियोंके २–२ पर्यायोंमें से १–१ पर्यायके द्वारा उनका मुख्य नाम व्यक्त होता है, तथा १–१ पर्यायमें उनके पिताका नाम सूचित होता है। अनुपदोक्त (३६२में) 'अचलः'से 'रामः' तक ९ पूर्वोक्त (३६२) 'त्रिपृष्ठ' आदि अर्धचक्रवर्तियोंके अग्रज (बड़े भाई) हैं, तथा क्रमशः इनके भी वे ही पिता हैं, जो 'त्रिपृष्ठ' आदि ९ अर्धचक्रवर्तियोंके हैं । स्पष्ट-ज्ञानार्थ चक्र देखना चाहिए ॥

अर्धचक्रिणां तदग्रजानां तत्पितॄणां रिपूणाञ्च नामबोधकचक्रम्

क्रमा०	अर्धचक्रिणः	वर्णः	तदग्रजाः	वर्णः	तत्पितरः	तद्रिपवः
१	त्रिपृष्ठः	श्याम.	अचलः	शुक्लः	प्रजापतिः	अश्वग्रीवः
२	द्विपृष्ठः	,,	विजयः	,,	ब्रह्मा	तारकः
३	स्वयम्भूः	,,	भद्रः	,,	रुद्रः	मेरकः
४	पुरुषोत्तमः	,,	सुप्रभः	,,	सोमः	मधुः
५	पुरुषसिंहः	,,	सुदर्शनः	,,	शिवः	निशुम्भः
६	पुरुषपुण्डरीकः	,,	आनन्दः	,,	महाशिराः	बलिः
७	दत्तः	,,	नन्दनः	,,	अग्निसिंहः	प्रह्लादः
८	नारायणः	,,	पद्मः	,,	दशरथः	लंकेशः (रावणः)
९	कृष्णः	,,	रामः	,,	वसुदेवः	मगधेश्वरःजरासन्ध

१जिनैः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी ।
२आदिराजः पृथुर्वैन्यो ३मान्धाता युवनाश्वजः ॥ ३६४ ॥
४धुन्धुमारः कुवलाश्वो ५हरिश्चन्द्रस्त्रिशङ्कुजः ।
६पुरूरवा बौध ऐल उर्वशीरमणश्च सः ॥ ३६५ ॥
७दौष्यन्तिर्भरतः सर्वदमः शकुन्तलात्मजः ।
८हैहयस्तु कार्तवीर्यो दोःसहस्रभृदर्जुनः ॥ ३६६ ॥
९कौशल्यानन्दनो दाशरथो रामो—

---

१. पूर्व (१ । २६–२८) कथित २४ जिनेन्द्रों (तीर्थङ्करों)के साथ ये ३९ ('भरत' आदि १२ चक्रवर्ती, 'त्रिपृष्ठ' आदि ९ अर्धचक्रवर्ती, 'अचल' आदि ९ बलदेव (त्रिपृष्ठ आदिके अग्रज) और 'अश्वग्रीव' आदि ९ प्रतिवासुदेव (त्रिपृष्ठ आदिके शत्रु १२+९+९+९ = ३९) मिलकर कुल ६३ (२४ + ३९ = ६३) 'शलाकापुरुष' कहे जाते हैं ॥

२. (अब विविध राजाओंके पर्याय कहते हैं—) 'पृथु'के ३ नाम हैं—आदिराजः, पृथुः, वैन्यः ॥

३. 'मान्धाता'के २ नाम हैं—मान्धाता (– तृ), युवनाश्वजः ॥

४. 'धुन्धुमार'के २ नाम हैं—धुन्धुमारः, कुवलाश्वः ॥

५. 'हरिश्चन्द्र'के २ नाम हैं—हरिश्चन्द्रः, त्रिशङ्कुजः ॥

६. 'पुरूरवा'के ४ नाम हैं—पुरूरवाः (– वस्), बौधः, ऐलः, उर्वशीरमणः ॥

७. 'भरत (चक्रवर्ती)'के ४ नाम हैं—दौष्यन्तिः (+दौष्मन्तिः), भरतः, सर्वदमः (+सर्वदमनः), शकुन्तलात्मजः ॥

८. 'कार्तवीर्य (सहस्रार्जुन)'के ४ नाम हैं—हैहयः, कार्तवीर्यः, दोःसहस्रभृत् (+सहस्रबाहुः), अर्जुनः ॥

विमर्श—ये 'मान्धाता' आदि ६ चक्रवर्ती राजा थे। जैसा कहा भी है—

मान्धाता धुन्धुमारश्च हरिश्चन्द्रः पुरूरवाः ।
भरतः कार्तवीर्यश्च षडेते चक्रवर्तिनः ॥ इति ॥

(अर्थात् मान्धाता, धुन्धुमार, हरिश्चन्द्र, पुरूरवा, भरत और कार्तवीर्य ये छः चक्रवर्ती कहाते हैं ।'

९. 'रामचन्द्र (राजा राम)'के ३ नाम हैं—कौशल्यानन्दनः, दाशरथिः, रामः (+रामभद्रः, रामचन्द्रः) ॥

—१ऽस्य तु प्रिया ।
वैदेही मैथिली सीता जानकी धरणीसुता ॥ ३६७ ॥
२रामपुत्रौ कुशलवावेकयोक्त्या कुशीलवौ ।
३सौमित्रिर्लक्ष्मणो ४वाली वालिरिन्द्रसुतश्च सः ॥ ३६८ ॥
५आदित्यसूनुः सुग्रीवो ६हनुमान् वज्रकङ्कटः ।
मारुतिः केशरिसुत आञ्जनेयोऽर्जुनध्वजः ॥ ३६९ ॥
७पौलस्त्यो रावणो रक्षो लङ्केशो दशकन्धरः ।
८रावणिः शक्रजिन्मेघनादो मन्दोदरीसुतः ॥ ३७० ॥
९अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः ।
कङ्कोऽजमीढो १०भीमस्तु मरुत्पुत्रो वृकोदरः ॥ ३७१ ॥
किर्मीर-कीचक वक-हिडिम्बानां निषूदनः ।

---

१. 'रामकी स्त्री (सीता)'के ५ नाम हैं—वैदेही, मैथिली, सीता, जानकी, धरणीसुता ॥

२. 'रामके पुत्रों'का १-१ नाम है—कुशः, लवः । तथा दोनों पुत्रोंका एक साथ 'कुशीलवौ' (नि० द्वि०) १ नाम है ॥

३. 'लक्ष्मण'के २ नाम हैं—सौमित्रिः, लक्ष्मणः ॥

४. 'बाली (सुग्रीवके बड़े भाई)'के ३ नाम हैं—वाली (-लिन), वालिः, इन्द्रसुतः (+सुग्रीवाग्रजः) ॥

५. 'सुग्रीव'के २ नाम हैं—आदित्यसूनुः, सुग्रीवः ॥

६. 'हनुमान'के ६ नाम हैं—हनुमान (-मत् ।+हनूमान्, -मत्), वज्रकङ्कटः, मारुतिः, केशरिसुतः, आञ्जनेयः, अर्जुनध्वजः ॥

७. 'रावण'के ५ नाम हैं—पौलस्त्यः, रावणः, रक्षईशः, लङ्केशः (यौ०—राक्षसेशः, लङ्कापतिः,……), दशकन्धरः (+दशास्यः, दशशिराः-रस्, दशकण्ठः,……) ॥

८. 'रावणपुत्र (मेघनाद)'के ४ नाम हैं—रावणिः, शक्रजित्, मेघनादः, मन्दोदरीसुतः ॥

९. 'युधिष्ठिर'के ६ नाम हैं—अजातशत्रुः, शल्यारिः, धर्मपुत्रः, युधिष्ठिरः, कङ्कः, अजमीढः ॥

१०. 'भीमसेन, भीम'के ७ नाम हैं—भीमः (+भीमसेनः), मरुत्पुत्रः, वृकोदरः, किर्मीरनिषूदनः, कीचकनिषूदनः, बकनिषूदनः, हिडिम्बनिषूदनः (यौ०—कीर्मीरारिः, कीचकारिः, बकारिः,………) ॥

१अर्जुनः फाल्गुनः पार्थः सव्यसाची धनञ्जयः ॥ ३७२ ॥
राधावेधी किरीटयैन्द्रिर्जिष्णुः श्वेतहयो नरः ।
बृहन्नटो गुडाकेशः सुभद्रेशः कपिध्वजः ॥ ३७३ ॥
बीभत्सः कर्णजित् २तस्य गाण्डीवं गाण्डिवं धनुः ।
३पाञ्चाली द्रौपदी कृष्णा सैरन्ध्री नित्ययौवना ॥ ३७४ ॥
वेदिजा याज्ञसेनी च ४कर्णश्चम्पाधिपोऽङ्गराट् ।
राधा-सूता-ऽर्कतनयः ५कालपृष्ठं तु तद्धनुः ॥ ३७५ ॥
६श्रेणिकस्तु भम्भासारो ७हालः स्यात् सातवाहनः ।
८कुमारपालश्चौलुक्यो राजर्षिः परमार्हतः ॥ ३७६ ॥
मृतस्वमोक्ता धर्मात्मा मारिव्यसनवारकः ।
९राजबीजी राजवंश्यो—

---

१. 'अर्जुन'के १७ नाम हैं—अर्जुनः, फाल्गुनः, पार्थः, सव्यसाची (-चिन्), धनञ्जयः, राधावेधी (-धिन्), किरीटी (-टिन्), ऐन्द्रिः, जिष्णुः, श्वेतहयः, नरः, बृहन्नटः, गुडाकेशः, सुभद्रेशः (+सुभद्रापतिः), कपिध्वजः, बीभत्सः, कर्णजित् (यौ०—किरीटी:, ····) ॥

शेषश्चात्र—अर्जुने विजयश्चित्रयोधी चित्राङ्गसदनः ।
योगी धन्वी कृष्णपत्नी नन्दिघोषस्तु तद्रथः ॥
ग्रन्थिकस्तु सहदेवो नकुलस्तन्तिपालकः ।
माद्रेयाविमौ, कौन्तेया भीमार्जुनयुधिष्ठिराः ।
द्वयेऽपि पाण्डवेयाः स्युः पाण्डवाः पाण्डवायनाः ॥

२. 'अर्जुनके धनुष'के २ नाम हैं—गाण्डीवम्, गाण्डिवम् (२ पु न) ॥

३. 'द्रौपदी'के ७ नाम हैं—पाञ्चाली, द्रौपदी, कृष्णा, सैरन्ध्री, नित्ययौवना, वेदिजा, याज्ञसेनी ॥

४. 'राजा कर्ण'के ६ नाम हैं—कर्णः, चम्पाधिपः, अङ्गराट् (-राज् । +अङ्गराजः), राधातनयः, सूततनयः, अर्कतनयः (यौ०—राधेयः,······) ॥

५. 'राजा कर्णके धनुष'का १ नाम है—कालपृष्ठम् ॥

६. 'राजा श्रेणिक'के २ नाम हैं—श्रेणिकः, भम्भासारः ॥

७. 'सातवाहन'के २ नाम हैं—हालः, सातवाहनः (+सालवाहनः) ॥

८. 'कुमारपाल'के ८ नाम हैं—कुमारपालः, चौलुक्यः, राजर्षिः, परमार्हतः, मृतस्वमोक्ता (-क्तृ), धर्मात्मा (-त्मन्), मारिवारकः, व्यसनवारकः ॥

९. 'राजकुलमें उत्पन्न'के २ नाम हैं—राजबीजी (-जिन्), राजवंश्यः ॥

—१बीज्यवंश्यौ तु वंशजे ॥ ३७७ ॥
२स्वाम्यमात्यः सुहृत्कोशो राष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः ३पौराणां श्रेणयोऽपि च ॥ ३७८ ॥
४तन्त्रं स्वराष्ट्रचिन्ता स्या५दावापस्त्वरिचिन्तनम् ।
६परिस्यन्दः परिकरः परिवारः परिग्रहः ॥ ३७९ ॥
परिच्छदः परिबर्हस्तन्त्रोपकरणे अपि ।
